No. ७८६ - घ

Title रघुवंशस्यसंजीवनीसमाख्यव्याख्या (सहितस्य

Author कालिदासः

Extent ३० Age

Subject काव्यमलंकारशास्त्रम् - अपूर्णम्

नं० ७८६-घ

रघुवंशस्य संजीवनीसमाख्यव्याख्यासहितस्य
प्रथम, षष्ठ, सप्तम सर्गाः (अलंकार शास्त्रम) काव्यम्

नं० ७८६-घ

पत्राणि ३० (अपूर्णम)

कर्ता कालिदासः

टीकाकारः मल्लिनाथः

॥श्रीजिनाय नमः॥ नमोऽस्तु विघ्ननाशाय भक्तिविघ्नविनाशिने। गौरीगौरीशदेवस्य सौरालजानंदहेतवे॥१॥ यस्यैकपादृष्टिमात्रेण जडः सर्वज्ञतां व्रजेत्। स्फुरतात्सा घनश्यामा मारामु
रमा मनोरमा॥२॥ मेघदूताख्यकाव्यस्य वाक्यपदविवेचनं क्रियते शारदं तत्र बालव्युत्पत्तिकारणं॥३॥ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति तस्मिन्मेघस्तु नि
र्देशलक्षणं मंगलाचरणं दर्शयति। कश्चित्कांतेति। कश्चिदनिर्दिष्टनामा यक्षः देवयोनिः॥ स्मरः तन्मयानिश्चलाणि इंद्रियाणि यस्य सः यक्षः रामगिर्याश्रमे।
षु रामाश्रितपर्वतोपवनेषु वसतिं वासं विदधे चक्रे रामो मनाज्ञो गिरिः तस्याश्रमाः तेषु आश्रयवाराः मोदप्रारप्यावस्तजः तेनाधिष्ठितो गिरिः ननु आश्रमे स्थिति बहु
वचनं कथं विरहिणं व्याकुलचित्तत्वेनैकत्रावस्थानाभावात् स्वरितभिः कर्तृभिः आयः क्रियाफलं इत्यात्मनेपदमपि। किं विधेषु जनकतनयास्नानपुण्योदकेषु
जनकस्य विदेहस्य तनया दुहिता जानकी तस्याः स्नानानि अश्नु यानि तैः पुण्यानि पवित्राणि उदकानि येषु तेषु। आस्नवस्नानं कंदं च मुदकं पाथ इत्यमरः ननु रा
मदेवे सति सीतायाः कथं प्राधान्यं तस्याः सहासतीत्वात्। पुनः किं विधेषु स्निग्धछायातरुषु स्निग्धा आरुढा छाया यातरवो निम्नलछाया स्तरुहाः ये षु रवौ परदि
भागमाज्यपि येषां छाया परिवृत्तिर्नास्तीति ते छायातरवः तेषु विटपी पादपस्तरुरित्यमरः किं विधो यक्षः स्वाधिकारप्रमत्तः स्वव्यापारेऽनवधानः पुनः किंविधो
यक्षः भर्तुः स्वामिनः कुवेरस्य शापेन अभिषंगेण अस्तंगमितमहिमा महतो भावो महिमा लोहितादेर्डिमनूच स्तं अदर्शनं गमितः प्रापितो महिमा यस्य सः किंवि
धेन शापेन वर्षभोग्येण अथवा वर्षं भोग्यते न कालाध्वनोरत्यंतसंयोगे इति द्वितीया संवत्सरेण भोग्यः तेन स्याद्धे लोकवत्सव धात्वं संवत्सरवर्षमत्रियाँ वित्यमरः॥
पुनः किंविधेन कांताविरहगुरुणा

रघुवंशादीका प्रथमसर्ग प. १

॥श्रीगणेशाय नमः॥ मातापितृभ्यां जगतो नमो वामार्धजानये। सद्यो दक्षिणदृक्पातसंकुचद्वामदृष्टये॥१॥ अंतरायतिमिरोपशांतये शांतपावनमचिंत्यवैभवं। तन्नरं वपु-
षि कुंजरं मुखे मन्महे किमपि तुंदिलं महः॥२॥ शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यं। करुणामसृणैः कटाक्षपातैः कुरु मामंब कृतार्थसार्थवाहं॥३॥ वाणीं काण-
भुजीमजीगणदवाशासीच्च वैयासकीमंतस्तंत्रमरंस्त पन्नगगवीगुंफेषु चाजागरीत्। वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः
॥४॥ मल्लिनाथकविः सोऽयं मंदात्मानुजिघृक्षया। व्याचष्टे कालिदासीयं काव्यत्रयमनाकुलं॥५॥ कालिदासगिरां सारं कालिदासः सरस्वती। चतुर्मुखोऽथवा साक्षाद्विदुर्नान्ये तु
मादृशाः॥६॥ तथापि दक्षिणावर्तनाथाद्यैः क्षुण्णवर्त्मसु। वयं च कालिदासोक्तिष्ववकाशं लभेमहि॥७॥ भारती कालिदासस्य दुर्व्याख्याविषमूर्छिता। एषा संजीवनी टीका तामद्योज्जी-
वयिष्यति॥८॥ इहान्वयमुखेनैव सर्वं व्याख्यायते मया। नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते॥९॥ इह खलु सकलकविशिरोमणिः कालिदासः। काव्यं यशसेऽर्थकृते व्यवहारविदे शि-
वेतरक्षतये। सद्यः परनिर्वृतये कांतासंमिततयोपदेशयुजे॥ इत्याद्यालंकारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनतां काव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यासत्काव्य-
विषयतां च पश्यन् रघुवंशाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनभूतविशिष्टदेवतानमस्कारस्य शिष्टाचारपरिप्राप्तत्वादाशि-
र्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति शास्त्रीयाद्वचनादन्यतमस्य प्रबंधमुखलक्षणत्वात् काव्यनिर्माणस्य विशिष्टशब्दार्थप्रतिपत्तिमूलत्वेन विशिष्टशब्दार्थयोश्च। शब्दजातमशेषं तु ध-
त्ते सर्वस्य वल्लभा। अर्थरूपं यदखिलं धत्ते मुग्धेंदुशेखरः॥ इति वायुपुराणसंहितावचनबलेन पार्वतीपरमेश्वरायत्तत्वदर्शनात्प्रतिपित्सया तावेवाभिवादयते वागर्थाविति वागर्थाविवे-

श्रीगणपतये नमः। वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वंदे पार्वतीपरमेश्वरौ॥१॥ क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः। तितीर्षुर्दुस्तरं मोहादुडु-
पेनास्मि सागरं॥२॥ मंदः कवियशःप्रार्थी गमिष्याम्युपहास्यतां। प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥३॥ ॥

त्येकं पदं। इवेन सह समासो विभक्त्यलोपश्च पूर्वपदप्रकृति-
स्वरत्वं च वक्तव्यं। एवमन्यत्रापि द्रष्टव्यं। वागर्थाविव शब्दार्थाविव संपृक्तौ नित्यसंबद्धावित्यर्थः। नित्यसंबद्धयोरुपमानत्वेनोपादानान्नित्यः शब्दार्थसंबंध इति मीमांसकाः। जगतो लोकस्य पित-
रौ माता च पिता च पितरौ। पिता मात्रेति द्वंद्वैकशेषः। मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ इत्यमरः। एतेन सर्वशिवयोः सर्वजगज्जनकतया वैशिष्ट्यमिष्टार्थप्रदानशक्तिः परमकारुणिकत्वं च सूच्य-
ते। पर्वतस्यापत्यं स्त्री पार्वती। तस्यापत्यमित्यण्प्रत्ययः। टिड्ढाणञित्यादिना ङीप्। पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ। परमशब्दः सर्वोत्तमत्वद्योतनार्थः। मातुरभ्यर्हितत्वादल्पतरत्वाच्च पार्वतीशब्दस्य पू-
र्वनिपातः। वागर्थप्रतिपत्तये शब्दार्थयोः सम्यक्ज्ञानार्थं वंदे अभिवादये। अत्रोपमालंकारः स्फुट एव। तथोक्तं। स्वतःसिद्धेन भिन्नेन संपन्नेन च धर्मतः। साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकगोपमा॥ इ-
ति। भाविकश्चायमलंकारः। कालिदासोक्तौ काव्यादौ भूदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगाच्छुभलाभः सूच्यते। तदुक्तं। शुभदो मो भूमिमय इति। वकारस्यामृतबीजत्वात्प्रचयगमनसिद्धिः
॥१॥ संप्रति कविः स्वाहंकारं परिहरति। क्वेत्यादि श्लोकद्वयेन। प्रभवत्यस्मादिति प्रभवः कारणं। ऋदोरप्। कर्तरि च कारके संज्ञायामिति साधुः। सूर्यः प्रभवो यस्य स सूर्यप्रभवः वंशः क्व। अल्प-
के विषयो ज्ञेयोऽर्थो यस्याः सा मे मतिः प्रज्ञा क्व। द्वौ क्वशब्दौ महदंतरं सूचयतः। सूर्यवंशमाकलयितुं न शक्नोमीत्यर्थः। तथा च तद्विषयप्रबंधनिरूपणं तु दूरापास्तमिति भावः। तथाहि। दुस्तरं त-
रितुमशक्यं। ईषद्दुःसुषु इत्यादिना खल्प्रत्ययः। सागरं मोहादज्ञानादुडुपेन। उडुपं तु प्लवः कोलः इत्यमरः। अथवा चर्मावनद्धेन चर्मपात्रेण। चर्मावनद्धमुडुपं प्लवः काष्ठं करंडवदिति सज्जनः। तिती-
र्षुस्तरितुमिच्छुः। तरतेः सन्नंतादुप्रत्ययः। अल्पसाधनैरधिकारंभो न सुकर इति भावः॥२॥ इदं च वंशोत्कर्षकथनं स्वप्रबंधमहत्त्वार्थमेव। तदुक्तं। प्रतिपाद्यमहिम्ना च प्रबंधो महतां रतिः। लक्षणं तावदाशंकि-
चामंदो मूढः। मूढाल्पापटुनिर्भाग्या मंदाः स्युः इत्यमरः। तथापि कवियशःप्रार्थी कवीनां यशः काव्यनिर्माणेन जातं यशस्तत्प्रार्थी सोऽहं प्रांशुना उन्नतपुरुषेण लभ्यं प्राप्यं फले फलविषये लोभादु-
द्बाहुः। फलग्रहणायोच्छ्रितहस्तो वामनो ह्रस्व इव। खर्वो ह्रस्वश्च वामनः इत्यमरः। उपहास्यतामुपहासविषयतां। ऋहलोर्ण्यदिति ण्यत्प्रत्ययः। गमिष्यामि प्राप्स्यामि॥३॥

मंदः क्षेत्र तर्हि तस्य तामयमनुद्योग इत्यत आह। अथवेति। अथवा पूर्वसूरिभिः कविभिर्वाल्मीक्यादिभिः कृतवाग्द्वारे कृता रामायणादिप्रबंधरूपया वाक् सैव द्वारं प्रवेशो यस्य तस्मिन् अस्मि-
न्सूर्यप्रभवे वंशे कुले जन्मनैकेन लक्षणः संतानो वंशः वज्रेण मणिवेधकसूचिविशेषेण। वज्रं त्वस्त्री कुलिशे शस्त्र्योर्मणिवेधे रत्नभेदे इति केशवः। समुत्कीर्णे विद्धे मणौ रत्नसूत्रस्येव मे गतिः संचारोऽस्ति
वर्णनीये रघुवंशे मम वाक्प्रसारोऽस्तीत्यर्थः।४। एवं रघुवंशे लब्धप्रवेशस्तद्वर्णनं प्रतिजानीते। सोऽहमित्यादिभिः पंचभिः श्लोकैः कुलकेनाह। सोऽहं रघूणामन्वयं वक्ष्ये इत्युत्तरेण संबंधः। किंविधानां रघू-
णामित्यत्र उत्तराणि विशेषणानि योज्यानि। आजन्मनः जन्मारभ्येत्यर्थः। आङ् मर्यादाभिविध्योरित्यव्ययीभावः। तस्य शुद्धानां सह सुपेति समासः। एवमुत्तरत्रापि द्रष्टव्यं। आजन्मशुद्धानां निषेकादि सर्वसं-
स्कारसंपन्नानामित्यर्थः। आफलोदयं आफलोदयसिद्धेः कर्म येषां ते तथोक्तास्तेषामारब्धांतगामिनामित्यर्थः। आसमुद्रक्षितीशानां सार्वभौमानामित्यर्थः। आनाकरथवर्त्म येषां तेषां इंद्रसह-
चारिणामित्यर्थः। अत्र सर्वत्र आङोऽभिविध्यर्थत्वं द्रष्टव्यं। अन्यथा मर्यादार्थत्वे जन्मादिशुद्ध्यभावप्रसंगात्।५। यथाविधिमिति। विधिमनतिक्रम्य यथाविधि यथासादृश्ये इत्यव्ययीभावः। तेषां हुत-
शब्देन सह सुपेति समासः एवं यथाकामार्चितेत्यादीनामपि द्रष्टव्यं। यथाविधि हुताः अग्नयो यैस्तेषां यथाकामाभिलाषमनतिक्रम्य अर्चितार्थिनां। यथापराधमपराधमनतिक्रम्य दंडो येषां तेषां
यथाकालप्रबोधिनां कालमनतिक्रम्य प्रबोधशीलानां। चतुर्भिर्विशेषणैर्देवतायजनातिथिसत्कारदंडधरत्वप्रजापालनसमयजागरूकत्वादीनि विवक्षितानि।६। त्यागायेति। त्यागाय सत्पा-
त्रे विनियोगस्त्यागः तस्मै संभृतार्थानां संचितधनानां न तु दुर्व्ययाय। सत्याय मितभाषिणां मितभाषणशीलानां न तु पराभवाय। यशसे विजिगीषूणां जेतुमिच्छू-
नां न त्वर्थसंग्रहाय। प्रजायै संतानाय गृहमेधिनां दारपरिग्रहाणां न तु कामोपभोगाय। अत्र त्यागायेत्यादिषु चतुर्थी तदर्थ्येत्यादिना तादर्थ्ये चतुर्थीसमासविधानज्ञापकाच्चतुर्थी। गृहैर्दारैर्मेधंते संग-
च्छंत इति गृहमेधिनः। दारेष्वपि गृहाः इत्यमरः। जायायां गृहिणी गृहाः इति हलायुधः। मेधृ संगमे इति णिनिः। एभिर्विशेषणैः परोपकारित्वं सत्यवचनत्वं यशःपरत्वं पितृणामनृणत्वं च विवक्षि-

अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः। मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥४॥ सोऽहमाजन्मशुद्धानामाफलोदयकर्मणां। आसमुद्रक्षितीशानामानाकरथवर्त्मनां॥५॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां। यथापराधदंडानां यथाकालप्रबोधिनां॥६॥ त्यागाय संभृतार्थानां सत्याय मितभाषिणां। यशसे विजिगीषूणां प्रजायै गृहमेधि-
नां॥७॥ शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणां। वार्धके मुनिवृत्तीनां योगेनांते तनुत्यजां॥८॥ रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्। तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥
९॥ तं संतः श्रोतुमर्हंति सदसद्व्यक्तिहेतवः। हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥१०॥ वैवस्वतो मनुर्नाम माननीयो मनीषिणां। आसीन्महीक्षितामाद्यः प्रण-

तानि।७। शैशव इति। शिशोर्भावः शैशवं बाल्यं। शिशुत्वं शैशवं बाल्यमित्यमरः। तारुण्ये यौवने समे इत्यमरः। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् इत्यञ्प्रत्ययः। तस्मिन्नभ्यस्तविद्यानां। ए-
तेन ब्रह्मचर्याश्रमो विवक्षितः। यूनो भावः यौवनं युवादित्वादण्प्रत्ययः। तस्मिन् विषयैषिणां भोगाभिलाषिणां। एतेन गृहस्थाश्रमो विवक्षितः। वृद्धस्य भावो वार्धकं वृद्धत्वे। द्वंद्वमनोज्ञादिभ्यश्चेति
वुञ्। वार्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणीति विश्वः। संघातार्थे तु वृद्धानामिति व्युत्पत्तिः। तस्मिन्वार्धके वयसि मुनीनामिव वृत्तिर्येषां। एतेन वानप्रस्थाश्रमो विवक्षितः। अंते श-
रीरत्यागकाले योगेन परमात्मध्यानेन योगः संनहनोपायध्यानसंगतियुक्तिष्वित्यमरः। तनुं त्यजंतीति तनुत्यजः। अन्येभ्योऽपि दृश्यत इति क्विप्। तेषां देहत्यागिनां। एतेन मोक्षभावो विवक्षितः।८। रघू-
णामिति। सोऽहं लब्धप्रवेशः तनुर्वाग्विभवो यस्य सोऽल्पवाणीप्रसारोऽपि सन्। तेषां गुणैः तद्गुणैः आजन्मशुद्ध्यादिभिः कर्तृभिः कर्णमभ्येत्य आगत्य चापलाय युवादित्वात्कर्मण्यण्। चापलं चपलं कर्म
विमृश्यकारित्वं कर्तुं क्रियार्थोपपदेत्यादिना चतुर्थी प्रचोदितः सन्नप्रेरितः सन् रघूणामन्वयं विषयप्रबंधं वक्ष्ये। इति कुलकं।९। संप्रति स्वप्रबंधपरीक्षार्थं संतः प्रार्थ्यंते। तमिति। तं रघुवंशाख्यप्रबंधं
सदसतोः गुणदोषयोः व्यक्तेः हेतवः कर्तारः संतः श्रोतुमर्हंति। तथा हि। हेम्नो विशुद्धिर्निर्दोषत्वस्वरूपं श्यामिकापि लोहांतरसंसर्गादिदोषो वा अग्नौ संलक्ष्यते। नान्यत्र तद्वदत्रापि सतामेव दोषविवेकाधि-
कारित्वमन्येष्विति भावः।१०। वर्ण्यं वस्तु प्रतिपादयति। वैवस्वत इति। मनस ईषिणो मनीषिणः धीराः विद्वांस इति यावत् पृषोदरादित्वात्साधुः। तेषां माननीयः पूज्यः छंदसां वेदानां प्रणव ओंकार इव महीक्षितां
प्रसे च वेदे चेति विश्वः। महीं क्षियंति ईशते महीक्षितः क्षितीश्वराः क्षि धातोरैश्वर्यार्थात्क्विप्। तेषामाद्यः। आदिमः। विवस्वतः सूर्यस्यापत्यं पुमान्वैवस्वतो नाम वैवस्वत इति प्रसिद्धो मनुर्नाम।

तदन्वय इति। शुद्धिरस्यास्तीति शुद्धिमान्। तस्मिन् शुद्धिमति निर्दोषवति। अन्ववायोऽन्वयो वंशो गोत्रं चाभिजनः कुलमिति हलायुधः। तदन्वये तस्य मनोरन्वये कुले। अतिशयेन शुद्धिमान् शुद्धिमत्तरः। द्विवच-
नविभज्येत्यादिना तरप्। दिलीप इति प्रसिद्धो राजेन्दुः राजश्रेष्ठः। उपमितं व्याघ्रादिभिरिति समासः। क्षीरनिधाविन्दुरिव प्रसूतः जातः॥१२॥ व्यूढेति। व्यूढेत्यादिभिः श्लोकैः दिलीपं विशिनष्टि। व्यूढं विपुलं
उरो यस्य स व्यूढोरस्कः। उरःप्रभृतिभ्यः कप्। व्यूढं विपुलं भद्रं स्फारं समं वरिष्ठं चेति यादवः। वृषस्य स्कन्ध इव स्कन्धो यस्य स तथा सप्तम्युपमानेत्यादिना उत्तरपदलोपो बहुव्रीहिः। शालो वृक्ष इव प्रांशुरुन्नतः शालप्रांशुः
आकारवृक्षयोः शालः। शालः सर्जतरुः स्मृत इति यादवः। महाभुजो महाबाहुः। आत्मकर्मक्षमं स्वव्यापारानुरूपं देहमाश्रितः। क्षात्रः क्षत्रसंबंधी धर्म इव स्थितः। मूर्तिमान् पराक्रम इव स्थित इत्युत्प्रेक्षा॥१३॥ सर्वातिरिक्तेति
सर्वातिरिक्तसारेण सर्वेभ्यो भूतेभ्योऽधिकबलेन सर्वाणि भूतानि तेजसाऽभिभवतीति सर्वतेजोभिभाविना तेन सर्वेभ्य उन्नतेनात्मना शरीरेण। आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीति विश्वः। मेरुरिवोर्वीं क्रान्त्वा आक्र-
म्य स्थितः। मेरुपक्षे विशेषणानि तुल्यानि। अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः। तस्मादभिभवत्येष सर्वभूतानि तेजसेति मनुवचनात् राज्ञः सर्वतेजोऽभिभवित्वं ज्ञेयम्॥१४॥ आकारेति। आकारेण मूर्त्या सदृशी प्रज्ञा
यस्य सः। प्रज्ञया सदृशागमः प्रज्ञानुरूपश्रुतपरिश्रमः। आगमैः सदृशः आरंभः कर्म यस्य स तथोक्तः। आरभ्यत इत्यारंभः कर्म। तत्सदृश उदयः फलोदयः फलसिद्धिर्यस्य स तथोक्तः॥१५॥ भीमेति। भीमैः कान्तैश्च नृपगुणैः
राजगुणैः तेजःप्रतापादिभिः कुलशीलदाक्षिण्यादिभिश्च स दिलीप उपजीविनामाश्रितानां यादोभिः जलजन्तुभिः। यादांसि जलजन्तवः इत्यमरः। रत्नैश्चार्णव इव अधृष्यः अनभिभवनीयश्चाभिगम्यश्चाश्रयणीयश्च
बभूव॥१६॥ रेखामात्रमिति। नियन्तुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य संबंधिन्यः नेमीनां चक्रधाराणां वृत्तिर्व्यापारो यासां ताः। चक्रधारा प्रधिर्नेमिरित्यमर इति यादवः। चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमानित्य-
मरः। प्रजाः आ मनोः मनुमारभ्य अभिविधिः पदद्वयं चैतत् समासस्य विभाषितत्वात्। क्षुण्णा[illegible]स्यादभ्यस्तावहतासु वर्त्मनः आचारपद्धतेः अध्वनश्च परमधिकमित्यर्थः। रेखाप्रमाणमस्येति रेखामात्रं रेखाप्रमाणमीषद-
पीत्यर्थः। प्रमाणे द्वयसज्दघ्नञ्मात्रचः इति मात्रच् प्रत्ययः। परिशब्दविशेषणं चैतत्। न व्यतीयुः नातिक्रान्तवत्यः। कुशलसारथिप्रेरिता रथनेमय इव तस्य प्रजाः पूर्वक्षुण्णमार्गं न जहुरित्यर्थः॥१७॥ प्रजानामिति। स राजा प्रजानाम्

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः। दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव॥१२॥ व्यूढोरस्को वृषस्कंधः शालप्रांशुर्महाभुजः। आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः॥१३॥
सर्वातिरिक्तसारेण सर्वतेजोभिभाविना स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना॥१४॥ आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः। आगमैः सदृशारंभ आरंभस-
दृशोदयः॥१५॥ भीमकान्तैर्नृपगुणैः स बभूवोपजीविनां। अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥१६॥ रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परं न व्यतीयुः प्रजास्तस्य
नियन्तुर्नेमिवृत्तयः॥१७॥ प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्। सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥१८॥ सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनं। शास्त्रेष्वकुण्ठिता
बुद्धिर्मौर्वी धनुषि चातता॥१९॥ तस्य संवृतमंत्रस्य गूढाकारेङ्गितस्य च। फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव॥२०॥ जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्॥२१॥

भूत्यर्थमिति। वृद्ध्यर्थमेव अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या इति क्रियाविशेषणं चैतत्। ताभ्यः प्रजाभ्यो बलिं षष्ठांशरूपं करमग्रहीत्।
भागधेयः करो बलिरित्यमरः। तथाहि रविः सहस्रगुणं यस्मिन् कर्मणि तद्यथा तथा उत्स्रष्टुं दातुं उत्सर्जनक्रियाविशेषणं चैतत्। रसं आदत्ते। रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः शृङ्गारादौ द्रवे वीर्ये देहधा-
त्वंबुपारदयोरिति विश्वः॥१८॥ संप्रति बुद्धिशौर्ये संपन्नस्य तस्यार्थसाधनेषु परानपेक्षत्वमाह। सेनेति। तस्य राज्ञः सेना चतुरंगबलं परिच्छाद्यतेऽनेनेति परिच्छदः उपकरणं बभूव। छत्रचामरादितुल्यमभूदित्यर्थः। पुंसि संज्ञायां घः प्रा-
येणेति घप्रत्ययः। छादेर्घेऽद्व्युपसर्गस्येति उपधाह्रस्वः। अर्थस्य प्रयोजनस्य तु साधनं द्वयमेव। शास्त्रेष्वकुण्ठिता अव्याहता बुद्धिः व्याहृतेत्स्यविपाकः धनुषि आतता आरोपिता मौर्वी च। मौर्वी ज्या शिञ्जिनी गुण इत्यमरः। नीतिपु-
रःसरमेव तस्य शौर्यमभूदित्यर्थः॥१९॥ राज्यमूलं मन्त्रसंरक्षणं तस्यास्तीत्याह। तस्येति। संवृतमन्त्रस्य गुप्तविचारस्य वेदभेदे गुप्तवादे मन्त्र इत्यमरः। शोकहर्षादिसूचको भ्रुकुटीमुखरागादिकारः इङ्गितं चेष्टितं हृद्गतभा-
वो वा इङ्गितं हृद्गतो भावो बहिराकार आकृतिरिति सज्जनः। गूढे आकारेङ्गिते यस्य स्वभावचापल्यादोषमपरं परया मुखरागादिलिङ्गैर्वा तृतीयगामी मन्त्रो यस्य तस्य प्रारभ्यन्त इति प्रारंभाः सामाद्युपायप्रयोगाः प्रा-
क्तने व्यये जन्मान्तरे तत्र भवाः प्राक्तनाः सायंचिरमित्यादिना ट्युट्युलौ प्रत्ययौ। संस्काराः पूर्वकर्मवासना इव फलेन कार्येणानुमेयाः अनुमातुं योग्याः आसन्। अत्र याज्ञवल्क्यः। मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षि-
तं कुर्याद्यथास्य न विदुः कर्म वा माफलोदयादिति॥२०॥ संप्रति सामाद्युपायान् विनैवात्मरक्षादिकं कृतवानित्याह। जुगोपेति। अत्रस्तोऽभीतः सन् त्रासोपाधिमन्तरेणैवाभिवर्णितदेः प्रथमसाधनत्वाद्देवात्मानं श-
रीरं जुगोप रक्षितवान्। अनातुरः नीरुजः एव सुकृतं धर्मं भेजे अर्जितवानित्यर्थः। अगृध्नुः अगर्धनशील एवार्थमाददे स्वीकृतवान्। त्रसिगृधिधृषिक्षिपेः क्नुः इति क्नुप्रत्ययः। आसक्तिरहित एव सुखमन्वभूत्॥२१॥ परस्परविरु-
द्धानामपि गुणानां तत्र साहचर्यमासीदित्याह। ज्ञान इति। ज्ञाने [illegible] येथाह कामंदः नान्योपतापि वचनं मौनं व्रतचरिष्णुतेति राज्ञो प्रति

कारसामर्थ्येपि सत्त्वमाऽपकारसहनं । त्रत्राणे लोकं त्राणः क्षमा । नो भूषलं त्वमेति त्यागे वितरणे सति त्यागो विहापितं दानमुत्सर्जनविसर्जने । विश्राणनं वितरणं स्पर्श
नं प्रतिपादनमित्यमरः । श्लाघाया विकत्थनस्य विपर्ययो ऽभावः । अत्राह मनुः । न दत्त्वा परिकीर्तयेदिति । इत्थं तस्य गुणाः ज्ञानादयः गुणैर्विरुद्धैर्मौनादिभिरनुबंधि
त्वात्साहचर्यात् सहप्रसवो जन्म येषां ते सप्रसवाः सोदरा इवाभूवन् विरुद्धा अपि गुणास्तस्मिन्नविरोधेनैवावस्थिता इत्यर्थः ॥२२॥ विविधं वृद्धत्वं ज्ञानतो वयसा
च तस्य ज्ञानेन वृद्धत्वमाह । अनाकृष्टस्येति । विषयैः शब्दादिभिः अनाकृष्टस्य अवशीकृतस्य विद्यानां वेदवेदांगानां पारदृश्वनः पारमंतं दृष्टवतः दृशेः क्वनिप् ध
र्मे रतिर्यस्य तस्य राज्ञो जरया विना विस्रसा जरेत्यमरः । षिद्भिदादिभ्योऽङ् प्रत्ययः जराया जरसन्यतरस्यामिति जरसादेशः । वृद्धत्वं वार्द्धकमासीत् तस्य यूनोपि वि
षयवैराग्यादिज्ञानगुणसंपत्त्या ज्ञानतो वृद्धत्वमासीत् इत्यर्थः । नाथस्तु चतुर्विधं वृद्धत्वमित्युक्त्वा अनाकृष्टस्येत्यादिना विद्यावयस्त्रयेणैव राज्ञस्ता
न् शीलवृद्धत्वानुक्तानीत्यवोचत् ॥२३॥ प्रजानामिति । प्रजायंत इति प्रजाः जनाः उपसर्गे च संज्ञायामिति डः प्रत्ययः । तासां विनयस्य शिक्षाया आधानात् करणात्
सन्मार्गे वर्त्तनादित्यर्थः । रक्षणात् भयहेतुभ्यस्त्राणात् आपन्निवारणादित्यर्थः । भरणात् अन्नपानादिभिः पोषणादपि स मनुष्ये स राजा पिताऽभूत् तासां पित
रस्तु जन्महेतवो जन्ममात्रकर्त्तारः केवलमुत्पादका एवाभूवन् जननमात्र एव पितृत्वं तेषां व्यापारः सदा शिक्षारक्षणादिकं तु स एव करोति स पिता यस्तु पोषक इति स्मरणात् ॥

रोनीतिनस्ति
पितृत्वं यदे
आदुष्पा १

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः गुणा गुणानुबंधित्वात्तस्य सप्रसवा इव ॥२२॥ अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः । तस्य धर्मरतेरासीद्
वृद्धत्वं जरसा विना ॥२३॥ प्रजानां विनयाधानाद्रक्षणाद्भरणादपि । स पिता पितरस्तासां केवलं जन्महेतवः ॥२४॥ स्थित्यै दंडयतो दंड्यान् परिणेतुः प्रसूतये । अ
प्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥२५॥ दुदोह गां स यज्ञाय सस्याय मघवा दिवं । संपद्विनिमयेनोभौ दधतुर्भुवनद्वयं ॥२६॥ न किलानुययुस्तस्य राजा
नो रक्षितुर्यशः । व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥२७॥

२५ स्थित्या इति । दंडमर्हतीति दंड्याः दंडादिभ्यो यदिति यत्प्रत्ययः । अदंड्यान् दंडयन् राजा दंड्यांश्चै
वाप्यदंडयन् । अयशो महदाप्नोति नरकं चैव गच्छतीति शास्त्रवचनेतान् दंड्यान् स्थित्यै लोकप्रतिष्ठायै दंडयतः शिक्षयतः एव प्रसूतये संतानायैव परिणेतुः दा
रान्परिगृह्णतो मनीषिणो विदुषस्तस्यार्थकामावपि धर्म एवास्तां जातौ । अत्र स्थितौ दंड्याः अर्थकामसाधनयोर्दंडविवाहयोर्लोकस्थापनप्रजोत्पादनरूपधर्मार्थ
त्वेनानुष्ठानादर्थकामावपि धर्मशेषतामापादयन् स राजा धर्मोत्तरोऽभूदित्यर्थः । आह हि गोतमः । यथाशक्ति धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यादिति ॥२५॥ दुदो
हेति । स राजा यज्ञाय यज्ञं कर्तुं गां भुवं दुदोह करग्रहणेनैव रिक्तां चकारेत्यर्थः । मघवा देवेंद्रः सस्याय सस्यं वर्द्धयितुं त्रिदिवं स्वर्गं दुदोह द्युलोकान्महीलोके वृष्टिमु
त्पादयामासेत्यर्थः । क्रियार्थोपपदस्येत्यादिना यज्ञसस्याभ्यां चतुर्थी एवमुभौ दिवि निमयेन परस्परमादानप्रतिदानाभ्यां भुवनद्वयं दधतुः पुपुषतुः राजा यज्ञैरिं
द्रलोकम् इंद्रश्चोदकेन भूलोकं पुपोषेत्यर्थः । उक्तं च दंडनीतौ राजा त्वर्थान्समाहृत्य कुर्यादिंद्रमहोत्सवं प्रीणितो मेघवाहस्तु महती वृष्टिमावहेदिति ॥२६॥ न किले
ति । राजानोऽन्ये नृपाः रक्षितुर्भयेभ्यस्त्रातुस्तस्य राज्ञो यशो नानुययुः किल नानुचक्रुः खलु कुतः यस्मात्कारणात् तस्करता चौर्यता परस्वेभ्यः परधनेभ्यः स्वविषय
भूतेभ्यो व्यावृत्ता सती तस्करवाचकशब्दे स्थिता [illegible] सतस्य पूर्वेज्ञानं त्राणं करोतीति स्याये नरा हे स्थिता

॥द्वेष्य इति॥ शिष्टो जनो द्वेष्योऽपि आतुरस्यार्त्तस्य रोगिणः औषधं यथा औषधमिव तस्य संमतोऽनुमतः आसीत् दुष्टो जनः प्रियोऽपि प्रेमास्पदीभूतोऽपि उरगाक्षता सर्पदष्टा अंगुलिरिव छिद्याद्बहुमपि दुष्टात्मन इति न्यायात् त्याज्य आसीत् तस्य शिष्ट एव बंधुर्दुष्ट एव शत्रुरित्यर्थः॥२८॥ तस्य परोपकारित्वमाह तमिति॥ वेधास्त्रष्टा स्रष्टा प्रजापतिर्वेधा इत्यमरः तं दिलीपं समाधीयत इति समाधिः कारणसामग्री महाभूतानां यः समाधिस्तेन विदधे ससर्ज नूनं ध्रुवमित्युत्प्रेक्षा तथाहि तस्य राज्ञः सर्वे गुणाः रूपरसादिमहाभूतगुणवदेव परार्थैकप्रयोजनमेवैकं मुख्यं फलं येषां ते तथोक्ता आसन् महाभूतगुणोपमानेन कारणगुणाः कार्ये संक्रामंतीति न्यायः सूचितः॥२९॥ स इति। वेलाः समुद्रकूलानि वेलाकूले विकारिधेरिति विश्वः ता एव वप्रवलयाः प्राकारवेष्टा यस्यास्तां स्याच्चयो वप्रमस्त्रियामित्यमरः प्राकारो वरणः शालः प्राचीनं प्रांततो वृत्तिरित्यमरः परितः खाता परिखाः दुर्गवेष्टने खातत्वे यत्परिखेत्यमरः अन्येष्वपि दृश्यत इति अपिशब्दात् खनेर्डप्रत्ययः अपरिखाः परिखाः संपद्यमानाः कृताः परिखीकृताः सागराः यस्यास्तां अभूततद्भावे च्विः अविद्यमानमन्यस्य राज्ञः शासनं यस्यास्तां अनन्यशासनामुर्वीमेकपुरीमिव शशास अनायासेन शासितवानित्यर्थः॥३०॥ तस्येति॥ तस्य राज्ञो मगधवंशजा जाता मगधवंशजा सप्तम्यां जनेर्ड इति डप्रत्ययः एतेनाभिजात्यमुक्तं दाक्षिण्यं परछंदानुवर्त्तनं दक्षिणः सरलोदारपरछंदानुवर्त्ति

द्वेष्योऽपि संमतः शिष्टस्तस्यार्त्तस्य यथौषधं त्याज्यो दुष्टः प्रियोप्यासीद्दष्टांगुलिरिवाहिना॥२८॥ तं वेधा विदधे नूनं महाभूतसमाधिना तथाहि सर्वे तस्यासन्परार्थैकफलागुणाः॥२९॥ स वेलावप्रवलयां परिखीकृतसागरां अनन्यशासनामुर्वीं शशासैकपुरीमिव॥३०॥ तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥३१॥ कलत्रवंतमात्मानमवरोधे महत्यपि। तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः॥३२॥ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः। विलंबितफलैः कालं स निनाय मनोरथैः॥३३॥ संतानार्थाय विधये स्वभुजादवतारिता तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे॥३४॥ अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया। तौ दंपती वसिष्ठस्य गुरोर्जग्मतुराश्रमं॥३५॥

क्षितिशास्यतः तेन रूढं प्रसिद्धं तेन नाम्नाऽध्वरस्य यज्ञस्य दक्षिणेव दक्षिणाख्या पत्नी वसुदक्षिणा इति प्रसिद्धा पत्नी आसीत् अत्र श्रुतिः यज्ञो गंधर्वस्तस्य दक्षिणाप्सरस इति दक्षिणाया दाक्षिण्यनाम कूलिजो दक्षिणत्वं प्रापकत्वेन दक्षिणां प्रतिगृह्णीतेति श्रुतेः॥३१॥ कलत्रवंतमिति॥ वसुधाधिपः अवरोधे अंतःपुरवर्गे महत्यपि सत्यपि मनस्विन्या दृढचित्तया पतिचित्तानुवृत्त्यादिनिर्बंधवत्येत्यर्थः तया सुदक्षिणया लक्ष्म्या च आत्मानं कलत्रवंतं भार्यावंतं मेने। कलत्रं श्रोणिभार्ययोरित्यमरः वसुधाधिप इत्यनेन वसुधया चेति गम्यते॥३२॥ तस्यामिति॥ आत्मानुरूपायां तस्यां आत्मनो जन्म यस्यासौ आत्मजन्मा पुत्रस्तस्मिन् समुत्सुकः यद्वा आत्मनो जन्मनि पुत्ररूपेणोत्पत्तौ समुत्सुकः सन् आत्मा वै पुत्रनामासीदिति श्रुतेः॥ विलंबितफलं पुत्रप्राप्तिरूपं येषां तैर्मनोरथैः कदा मे पुत्रो भवेदित्याशाभिः कालं निनाय यापयामास॥३३॥ संतानेति॥ तेन दिलीपेन संतानमर्थः प्रयोजनं यस्य तस्मै संतानार्थाय विधये अनुष्ठानाय स्वभुजादवतारिताऽवरोपिता जगतो गुर्वी धूः भारः सचिवेषु निचिक्षिपे निहिता॥३४॥ अथेति॥ अथ धुरोऽवतारणानंतरं पुत्रकाम्यया आत्मनः पुत्रेच्छया काम्यच्चेति पुत्रशब्दात्काम्यच्प्रत्ययः अप्रत्ययादिति पुत्रकाम्यधातोरकारप्रत्ययः ततष्टाप् तया तौ दंपती जायापती राजदंतादिषु जायाशब्दस्य निपातनात्साधुः तौ दंपती प्रयतौ भूत्वा विधातारं ब्रह्माणं समभ्यर्च्य स खलु पुत्रार्थिभिरुपास्यत इति भावः गुरोः कुलगुरोर्वशिष्ठस्याश्रमं जग्मतुः पुत्रप्राप्त्युपायोपदेशार्थमिति शेषः॥३५॥ स्निग्धेति॥ स्निग्धो मधुरो गंभीरो निर्घोषो यस्य तं एकस्यंदनं रथं प्रावृषि भवः प्रावृषेण्यः प्रावृष एण्य इत्येण्यप्रत्ययः तं प्रावृषेण्यं पयोवाहं मेघं विद्युदैरावताविव आस्थितौ आरूढौ जग्मतुरितिह

वैरावतसंबंधः इरा आपः इरम्भूर्वा क्षुरा सुरा सादित्यमरः इरावान्समुद्रस्तत्र भव ऐरावतो रभ्रमातंगः अभ्रमातंगत्वाच्चाभ्रे स्थितत्वादभ्ररूपत्वादिति क्षीरस्वामी अत एव
मेघारोहणे विद्युत्साहचर्यं घटते किं च विद्युदैरावतयोः साहचर्याद् ऐरावती संज्ञा ऐरावतस्य स्त्री ऐरावतीति क्षीरस्वामी तस्मात्तु ... कः विद्युदैरावताविवेति एकर
थारोहणे ... कार्यसिद्धिबीजं दंपत्योरसंततेर्मनस्तं सूचयति ।३६। मा भूदिति पुनः कथंभूतौ दंपती आश्रमपीडा मा भूदित्येतिहेतोः माङि लुङिति आशीरर्थे लुङ्
न माङ्योगे इत्यडागमप्रतिषेधः परिमेयपुरःसरौ परिमितपरिचरौ अनुभावविशेषात्तु तेजोविशेषात्सेनापरिवृताविव स्थितौ ।३७। सेव्यमानाविति । पुनः कथंभूतौ
सुखशीलत्वात्प्रियः संस्पर्शो येषां तैः शालनिर्यासगंधिभिः सर्जतरुनिष्यंदगंधवद्भिः शालः सर्जतरुः स्यादित्यमरः ततः उत्किरंतीति विक्षिपंतीति उत्किराः इगुपधे
त्यादिना किरतेः कप्रत्ययः पुष्परेणूनामुत्किराः धूता मांद्यादीषत्कंपिताः वनराजयो यैस्तैर्वातैः सेव्यमानौ ।३८। मनइति । रथनेमिस्वनोन्मुखैः मेघध्वानशंकयोन्न
मितमुखैः शिखंडिभिर्मयूरैः द्विधा भिन्नाः षड्जविकृतभेदेन आविकृतावस्थायाम्प्रजाताः षड्जः तदुक्तं नासाकंठमुरस्तालुजिह्वादंतांश्च संस्पृशन् षड्जः
संजायते यस्मात्तस्मात्षड्ज इति स्मृतः इति स च तंत्रीकंठजन्मा स्वरविशेषः निषादर्षभगांधारषड्जमध्यमधैवताः पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वरा इत्यम

स्निग्धगंभीरनिर्घोषमेकं स्यंदनमास्थितौ । प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ।३६। मा भूदाश्रमपीडेति परिमेयपुरस्सरौ । अनुभावविशेषात्तु सेनापरिवृ
ताविव ।३७। सेव्यमानौ सुखस्पर्शैः शालनिर्याससगंधिभिः पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ।३८। मनोभिरामाः शृण्वंतौ रथनेमिस्वनोन्मुखैः । षड्जसं
वादिनीः केकाः द्विधा भिन्नाः शिखंडिभिः ।३९। परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु । मृगद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ।४०। श्रेणीबंधाद्वितन्वद्भिरस्तं
भां तोरणस्रजं । सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ।४१।

रः षड्जेन संवादिनीः सदृशीः तदुक्तं मातंगेन षड्जं मयूरो वदतीति मनोभिरामाः मनसः प्रियाः
केमृद्धिकायंति ध्वनंतीति केकाः मयूरवाण्यः केका वाणी मयूरस्येत्यमरः ताः केकाः शृण्वंतौ इति शेषो कार्यः ।३९। परस्परेति । विस्रंभाददूरं समीपं यथा भवति तथोज्झ
ितं वर्त्म यैस्तेषु स्यंदनाबद्धदृष्टिषु स्यंदने रथे आबद्धा आसंजिता दृष्टिः नेत्रं येषां तेषु दृग्दृष्टिर्नेत्रलोचनचक्षुर्नयनांबकेक्षणं दृग्लीली इति हलायुधः कौतुकवशान्न
रथासक्तदृष्टिषु मृगद्वंद्वेषु मृगाश्च पुमान् स्त्रिया इत्येकशेषः तेषां मिथुनेषु द्वंद्वं द्वे पुंस्त्री पुंसो मिथुनं द्वंद्वमित्यमरः परास्परासी दृशां सादृश्यं परस्परं तौ दंपती पश्यंतौ समृगीषु मृगेषु
सुदक्षिणाक्षि सादृश्यं दिलीपाक्षि सादृश्यं मृगेष्विति विवेकः ।४०। श्रेणीति । श्रेणीबंधात् पंक्तिबंधाद्धेतोः अस्तंभां आधारस्तंभरहितां तोरणं बहिर्द्वारं तोरणोऽस्त्री
बहिर्द्वारमित्यमरः तत्र यास्रग्विरच्यते तां तोरणस्रजं वितन्वद्भिः कुर्वद्भिरित्यर्थः उत्प्रेक्षेयं ... कलनिर्ह्रादैः अव्यक्तमधुरध्वनिभिः
सारसैः पक्षिविशेषैः करलैः क्वचिदुन्नमिताननौ । सारसो मैथुनी कामी गोनर्दः पुष्कराह्वये इति यादवः ।४१। पवनस्येति प्रार्थनासिद्धिशंसिनः अनुकूलत्वादेव मनोरथसि
द्धिसूचकस्य पवनस्यानुकूलत्वात् गंतव्यदिगभिमुखत्वात् तुरगोत्कीर्णैरजोभिः अस्पृष्टान्यलकानि वेष्टनानि उष्णीषाणि च ययोस्तौ तयोः कौशिरस्त्रावेष्टनं ... सुतद
निवदतीति ।४२। सरसीष्विति । सरसीषु वीचिविक्षोभशीतलं ऊर्मिसंघट्टनेन शीतलं स्वनिःश्वासमनुकर्तुं शीलमस्येति स्वनिःश्वासानुकारिणं तेऽनेन त
शी

योरुक्तेः स्त्रीपुंसजातीयत्वमुक्तं । अरविंदानामामोदमुपजिघ्रंतौ घ्राणेन गृह्णंतौ ॥४३॥ ग्रामेष्विति आत्मविसृष्टेषु स्वदत्तेषु यूपो नाम संस्कृतः पशुबंधाय दारुविशेषः
यूपा एव चिह्नं येषां तेषु ग्रामेष्वमोघाः सफलाः यज्वानो विधिनेष्टवंतो यज्वा तु विधिनेष्टवान् इत्यमरः सुयजोर्ङ्वनिः प्रत्ययः आशिषः आशीर्वादान् अर्घ्यः पूजाविधि
स्तदर्थं द्रव्यमर्घ्यं पादार्घाभ्यां चेति यत्प्रत्ययः षट्सु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणी इत्यमरः अर्घ्यस्यानुपदमन्वर्घ्यं स्वीकारानंतरमित्यर्थः गृह्णंतौ स्वीकुर्वंतौ
पदस्य पश्चादनुपदं पश्चादर्थेऽव्ययीभावः अन्वेष्टान्वेषणमनुगोऽनुपदं क्लीबमव्ययं ॥४४॥ हैयंगवीनमिति । ह्यस्तनगोदोहोद्भवं घृतं हैयंगवीनं घः सर्वधुः तत्तु हैयंग
वीनं स्यात् ह्योगोदोहोद्भवं घृतमित्यमरः हैयंगवीनं संज्ञायामिति निपातः तत्सद्योघृतमादाय उपस्थितान् घोषवृद्धान् घोष आभीरपल्ली स्यादित्यमरः वन्यानां
मार्गशाखिनां नामधेयानि पृच्छंतौ उभयत्र व्यवीत्यादिना पृच्छतेर्द्विकर्मकत्वं ॥४५॥ कुलकं । कापीति । व्रजतोः गच्छतोः शुद्धवेषयोरुज्ज्वलनेपथ्ययोस्तयोः सुदक्षि
णादिलीपयोः हिमनिर्मुक्तयोश्चित्राचंद्रमसोरिव योगे सति काप्यनिर्वाच्याऽभिख्या शोभा आसीत् अभिख्या नामशोभयोरित्यमरः आतश्चोपसर्गे इति कः प्रत्ययः
चित्रा नक्षत्रविशेषः शिशिरापगमे चैत्र्यां चित्रापूर्णचंद्रमसोः शिवेत्यर्थः ॥४६॥ तत्तदिति । प्रियं दर्शनं स्वकर्म यस्यासौ प्रियदर्शनः योग्यदर्शनीयेत्यर्थः भूमिपतिः पत्न्यै त

पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥४२॥ सरसीष्वरविंदानां वीचिविक्षोभशीतलं आमोदमुपजिघ्रंतौ स्व
निःश्वासानुकारिणं ॥४३॥ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां अमोघाः प्रतिगृह्णंतावर्घ्यानुपदमाशिषः ॥४४॥ हैयंगवीनमादाय घोषवृद्धानुपस्थि
तान् नामधेयानि पृच्छंतौ वन्यानां मार्गशाखिनां ॥४५॥ इति कुलकं । काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव
॥४६॥ तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः अपि लंघितमध्वानं बुबुधे न बुधोपमः ॥४७॥ स दुःप्रापयशाः प्रापदाश्रमं श्रांतवाहनः सायं संयमिनस्तस्य म
हर्षेर्महिषीसखः ॥४८॥ वनांतरादुपावृत्तैः समित्कुशफलाहरैः पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥४९॥

त्तद्वस्तु दर्शयन् लंघितमपि व्याहितम
प्यध्वानं न बुबुधे न ज्ञातवान् बुधः सोमस्तदुपमानं यस्येति विग्रहः इदं च विशेषणं तत्तद्दर्शयन्दृष्टुप्रयोगितयैतस्य ज्ञातत्वसूचनार्थं ॥४७॥ स इति । दुःप्रापयशाः दुःप्रापमन्य
दुर्लभं यशो यस्य स तथोक्तः श्रांतवाहनः दूरोपगमात् क्लांतयुग्यः महिष्याः सखा महिषीसखः राजाहःसखिभ्यष्टजिति टच् प्रत्ययः सहायांतरे निरपेक्ष इति भावः राजा
सायं सायंकाले संयमिनो नियमवतस्तस्य महर्षेर्वसिष्ठस्याश्रमं प्रापत् आपत् पुषादित्वादङ् तमाश्रमं विशिनष्टि ॥४८॥ वनांतरादिति । वनांतरादन्यस्माद्वनांतरादुपा
वृत्तैः प्रत्यागतैः समिधश्च कुशाश्च फलानि च आहर्तुं शीलमेषामिति समित्कुशफलाहरास्तैः आङि ताच्छील्ये हरतेराङः प्रत्ययः अदृश्यैर्दर्शितैर्याज्ञेयैः
अग्निभिः वैतानिकैः प्रत्युद्याताः प्रत्युद्गतास्तैस्तपस्विभिः पूर्यमाणं प्रेक्ष्यागच्छतां नामाहिताग्नीनामग्निः प्रत्युद्यातेनैरिति श्रुतेः यथाह वामं वितरं ... सपुत्राः प्रत्या
धावत्येवं हतामग्नयः प्रत्याधावति फलादारुणि आहरन्तीति यद्येतन्न पुत्रेभ्य आहरन्तीति ताहरामिति विज्ञायते ॥४९॥

॥आकीर्णमिति नीवाराणां भाग एव भागधेयम्। भागरूपनामनामभ्यो धेयः इति वक्तव्यात् स्वार्थे धेयः प्रत्ययः भागधेयः करो बलिरित्यमरः तस्यो
चितैः। अत एवोटजानां पर्णशालानां द्वाररोधिभिः द्वाररोधकैर्मृगैः ऋषिपत्नीनामपत्यैरिवाकीर्णं व्याप्तम्॥५०॥ सेकान्त इति। सेकान्ते वृक्षमूलसेचनाव
साने मुनिकन्याभिः सेक्त्रीभिः आलवालेषु जलाधारप्रदेशेषु यदम्बु तत्पायिनाम्। स्यादालवालमावाप इत्यमरः। विहंगानां पक्षिणां विश्वासाय वि
श्रम्भाय समो विस्रम्भविश्वासावित्यमरः। तत्क्षणे सेककाले उज्झिता वालवृक्षका यस्मिंस्तत्। अल्पार्थे कप्रत्ययः॥५१॥ आतपात्ययमिति॥

आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः। अपत्यैरिव नीवारभागधेयोचितैर्मृगैः॥५०॥ सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम्॥
विश्वासाय विहंगानामालवालाम्बुपायिनाम्॥५१॥ आतपात्ययसंक्षिप्तनीवारासु निषादिभिः॥ मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमि
षु॥५२॥ अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान्॥ पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः॥५३॥ अथ यन्तारमादिश्य धु
र्यान्विश्रामयेति सः॥ तामवारोपयत्पत्नीं रथादवततार च॥५४॥

धान्यानि याकुलासु ...

आतपात्यये ऽपगमे सति संक्षिप्ता राशीकृताः नीवाराः तृणधान्यानि नीवाराः स्युरित्यमरः। उटजानां पर्णशालानामङ्गनभूमिषु चत्वरः। अङ्गे
षु पर्णशालोटजो ऽस्त्रियामित्यमरः। अङ्गनं चत्वराजिरे इति चामरः॥ निषादिभिरुपविष्टैः मृगैर्वर्तितो निष्पादितो रोमन्थः वर्तितच
र्वितो यस्मिन्नाश्रमे॥५२॥ अभ्युत्थितेति॥ अभ्युत्थिताः प्रज्वलिताः होमयोग्याः ... समिद्धे ऽग्नावाहुतिं जुहोतीति वचनात् तेषा
मग्नीनां पिशुनैः सूचकैः पवनोद्धूतैराहुतिगन्धो येषामस्तीत्याहुतिगन्धिनः तैर्धूमैराश्रमोन्मुखानतिथीन् पुनानं पवित्रीकुर्वाणम्॥५३॥
अथेति। अथाश्रमप्राप्त्यनन्तरं स राजा यन्तारं सारथिनमादिश्य धुरं वहन्तीति धुर्याः युग्याः धुरो यड्ढकाविति यत्प्रत्ययः हे यन्तः धुर्यधौरेय
धुरीणाः सधुरन्धरा इत्यमरः। धुर्यान् रथ्यान् विश्रामय विनीतश्रमान् कुर्वित्यादिश्य पत्नीं तामवारोपयत् अवतारितवान् स्वयं
चावततार विश्रमयन्निति ... दीर्घ ... इति सूत्रे वा चिण्णमुलोरित्यतो वेत्यनुव
र्त्या व्यवस्थितविभाषाश्रयणाद्वृद्ध्यभावः ... एवमुत्तरत्रापि ज्ञेयम्॥५४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

५

तस्मादिति॥ सभायां साधवः सभ्याः सभाया य इति यप्रत्ययः। गुप्ततमेंद्रियाः अत्यंतनियमितेंद्रियाः मुनयः सभार्याय गोप्त्रे रक्षकाय नयः शास्त्रमेव चक्षु
स्तत्त्वावेदकं प्रमाणं यस्य तस्मै नयचक्षुषे। तएवार्हते प्रशस्ताय पूज्यायेत्यर्थः। अर्हः प्रशंसायामिति शतृप्रत्ययः। तस्मै राज्ञेऽर्हणां पूजां चक्रुः। पूजा न
मस्यापचितिः सपर्यार्चार्हणाः समा इत्यमरः ॥५५॥ विधेरिति॥ सायंतनस्य सायंभवस्य सायंचिरमित्याह्निनाट्युप्रत्ययः। विधेर्जपहोमाद्यनुष्ठानस्यां
तेऽवसाने अरुंधत्यान्वासितं पश्चादुपवेशनेनोपचरितं कर्मणि क्तः। उपसर्गवशात्सकर्मकत्वं अन्वास्यैतामित्यादिवदुपपद्यते। तपोनिधिं वशि
ष्ठं स्वाहया स्वाहादेव्या अग्नायी स्वाहा तु हुतभुक्प्रियेत्यमरः। अन्वासितं हविर्भुजमिव ददर्श। समित्पुष्पकुशाग्न्यंबुमृदन्नाक्षतपाणिकः जप
होमं च कुर्वीत नाभिवाद्यो द्विजो भवेदिति अनुष्ठानस्य मध्येऽभिवादेन निषेधाद्विधेरंते ददर्शेत्युक्तं। अन्वासितं चात्र पतिव्रताधर्मत्वेनोक्तं। तत्तु
कर्मांगत्वे विधेरंत इति कर्मणः समाप्त्यभिधानात् ॥५६॥ तयोरिति॥ मागधी मगधराजपुत्री राज्ञी सुदक्षिणा राजा च तयोररुंधतीवशिष्ठयोः पादान्

तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रियाः। अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥५५॥ विधेः सायंतनस्यांते स ददर्श तपोनिधिम्। अन्वा
सितमरुंधत्या स्वाहयेव हविर्भुजं ॥५६॥ तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी। तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननंदतुः ॥५७॥ तमा
तिथ्यक्रियाशांतरथक्षोभपरिश्रमं॥ पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥५८॥ अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः। अर्थ्याम

जगृहतुः पादाग्रं प्रपदं पादः पदंघ्रिश्चरणोऽस्त्रियां। तद्ग्रंथी घुटिके गुल्फः स्त्रियां पार्ष्णिस्तयोरधः इत्यमरः। पादग्रहणमभिवादनं गुरुपत्नी च गुरुश्च कर्तारौ
तौ राजा च सचतौ सुदक्षिणादिलीपौ कर्मभूतौ प्रीत्या हर्षेण प्रतिननंदतुः। आशीर्वादादिभिः संभावयांचक्रुरित्यर्थः ॥५७॥ तमिति॥ मुनिरतिथ्यर्थमा
तिथ्यं अतिथेर्ञ्यः इति ञ्यः प्रत्ययः। आतिथ्यस्य क्रिया तया शांतो रथक्षोभेण यः परिश्रमः यस्य स तथोक्तस्तं राज्यमेवाश्रमे वाश्रमस्तत्र मुनिं मुनितुल्य
मित्यर्थः। तं दिलीपं राज्ये कुशलं पप्रच्छ। प्रच्छतेस्तु द्विकर्मकत्वमित्युक्तं यद्यपि राज्यशब्दः पुरोहितादिष्वणंताद्राजकर्मवचनः तथाप्यत्र सप्तांगवचनः उप
लक्षणं तु शिवं सप्तस्वांगेष्विति तु तत्र विरोधात्। तथाह मनुः स्वाम्यमात्यौ पुरं राष्ट्रं कोशदंडौ तथा सुहृत्। सप्तैतानि समस्तानि सप्तांगं राज्यमुच्यत इति। तत्र ब्राह्म
णं कुशलं पृच्छेत्क्षत्रबंधुमनामयं। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव चेति मनुवचने सत्यपि तत्स्वराज्ञो महानुभावत्वाल्लोपिते कुशलप्रश्न एव ब्रह्मतत्त्वानुसं
धेयः। अत एवोक्तं राज्याश्रममुनिरिति ॥५८॥ अथेति॥ अथ प्रश्नानंतरं विजितारिपुरः विजितशत्रुनगरः वदतां वक्तॄणां वरः श्रेष्ठः यतश्च निर्धारण
मिति षष्ठी। स्त्री पुंसि नगार्यो वित्यमरः। अर्थपतिः राजा अथर्ववेदोऽथर्ववेदस्य निधेः तस्य मुनेः पुरोऽग्रे अर्थ्यां अर्थादनपेतां धर्मपथ्यर्थन्यायादनपेतेऽ

५

उपपन्नमिति॥ हे गुरो सर्वस्वंगेषु स्वाम्यमात्यादिषु स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च राज्यांगानीत्यमरः शिवं कुशलं उपपन्नं ननु
युक्तमेव ननु स्वधारणे प्रश्नावधारणानुज्ञानुनयामंत्रणे नन्वित्यमरः कथमित्यत आह यस्य मे दैवीनां देवेभ्य आगतानां दुर्भिक्षादीनां मानुषी
णां मनुष्येभ्य आगतानां चोरभयादीनां उभयत्रापि तत आगत इत्यण् टिड्ढेति ङीप् आपदां व्यसनानां प्रतिहर्त्ता वारयिताऽसि अत्राह कामंदकः
उतान्नानो जलं व्याधिदुर्भिक्षं मरणं तथा। इति पंचविधं दैवं मानुषं व्यसनं ततः। आयुक्तकेभ्यश्चोरेभ्यो राजवल्लभात्। पृथिवीपतिलोभाच्च
नराणां पंचधा मतं॥५९॥ तत्र मानुषप्रतीकारमाह। तवेति। मंत्रान्कृतवान् मंत्रकृत्तस्य कर्मपापमंत्रपुण्येषु कृञ इति क्विप् दूरे स्वरोदय एव प्रश
मितारिभिः मंत्रकृतो मंत्राणां स्रष्टुः प्रयोक्तुर्वा तव मंत्रैः कर्तृभिः दृष्टं प्रत्यक्षयद्दृष्टं तन्मात्रं भिदंतीति दृष्टलक्ष्यभिदो मे शराः प्रत्यादिश्यंत इव

उपपन्नं ननु शिवं सप्तस्वंगेषु यस्य मे॥ दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदां॥६०॥ तव मंत्रकृतो मंत्रैर्दूरात्संशमितारिभिः॥ प्रत्यादिश्यंत इ
व मे दृष्टलक्ष्यभिदः शराः॥६१॥ हविरावर्जितं होतस्त्वया विधिवदग्निषु॥ वृष्टिर्भवति सस्यानामवग्रहविशोषिणां॥६२॥ पुरुषायुषजीविन्यो नि
रातंका निरीतयः॥ यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसं॥६३॥

वयमेव समर्थाः किमेभिः पिष्टपेषकैरिति निराक्रियंत इवेत्युत्प्रेक्षा। प्रत्यादेशो नि
राकृतिरित्यमरः त्वन्मंत्रसामर्थ्यादेव नः पौरुषं फलतीति भावः॥६१॥ संप्रति दैविकात्प्रतीकारमाह॥ हविरिति॥ हे होतस्त्वया विधिवदग्निष्वाव
र्जितं प्रक्षिप्तं हविराज्यादिकं कर्तृ अवग्रहो वर्षप्रतिबंधः अवग्राहो वर्षप्रतिबंध इत्यमरः तेन विशोषिणां विशुष्यतां सस्यानां वृष्टिर्भवति वृष्टि
रूपेण सस्यानि उपजीवयतीति भावः अत्र मनुः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इति॥६२॥ पुरु
षेति॥ आयुर्जीवितकालः पुरुषायुषं वर्षशतमित्यर्थः शतायुर्वै पुरुष इति श्रुतेः अचतुरेत्यादिसूत्रेणाच्प्रत्ययांतो निपातः मदीयाः प्रजाः पुरुषा
युषं जीवंतीति पुरुषायुषजीविन्यः निरातंका निर्भयाः आतंको भयमाशंकेति हलायुधः निरीतयो वृष्ट्यादिरहिता इति। यत्तस्य सर्वस्य त्वद्ब्रह्म
वर्चसं तव वृत्ताध्ययनसंपत्तिरेव हेतुः वृत्ताध्ययनसंपत्तिरित्येतद्ब्रह्मवर्चसमिति हलायुधः ब्रह्मणो वर्चो ब्रह्मवर्चसं ब्रह्महस्तिभ्यां वर्चस इत्य
च्प्रत्ययः। अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः इति कामंदकः॥६३॥ त्वयेति॥ ब्रह्मयोनिः का
रणं यस्य तेन ब्रह्मपुत्रेण गुरुणा त्वयैवमुक्तप्रकारेण चिंत्यमानस्यानुध्यायमानस्यातः एव निरापदो व्यसनहीनस्य मे संपदः सानुबंधाः सानुस्यूता
अनवच्छिन्ना इति यावत् कथं न स्युः स्युरेवेत्यर्थः॥६४॥ संप्रत्यागमनप्रयोजनमाह॥ किंत्विति॥ किंतु तवैतस्यां वध्वां स्नुषायां वधूर्जाया स्नुषा चैवे
त्यमरः अदृष्टसदृशी अनुरूपा प्रजा येन मां सद्वीपापि रत्नानि सूयत इति रत्नसूरपि सत्सु द्विषेत्यादिना क्विप् मेदिनी नावति न प्रीणाति अवधातोः

रुदृणानि पीत्वा दृष्टां वेदुःखं पदे दृशा द्रवणीत्याने रत्नस्य रपीत्यनेन सर्वरत्नेभ्यः पुत्ररत्नमेव श्लाघ्यमिति सूचितं ॥६४॥ तदेव प्रतिपादयति नूनमिति मत्तः प
रं मदनंतरं पंचम्यात्तसिल् पिंडविछेददर्शिनः पिंडदानविछेदमुत्प्रेक्षमाणाः वंशोभवाः वंश्याः पितरः स्वधेत्यव्ययं पितृभ्यो भोज्ये वर्त्तते तस्याः संग्रहेत
त्पराः आसक्ताः संतः श्राद्धपितृकर्मणि पितृदानेनिवापः स्यात् श्राद्धे कर्मणि शास्त्रतइत्यमरः नप्रकामभुजः पर्याप्तभोजिनो न भवंति कामं प्रकामं
पर्याप्तमित्यमरः निर्धनाह्यापद्धने किंयदपि संगृह्णंतीति भावः ॥६६॥ मत्परमिति ॥ मत्तः परं मदनंतरं मत्पराद्धि तिपंचमी दुर्लभं दुर्लभ्यं मत्वा मयाआव श्री
र्जितं दत्तं पयः शुद्धैः पितृभिः स्वनिःश्वासैः दुःखजैः कवोष्णमीषदुष्णं यथा स्यात्तथोपभुज्यते उपभोज्यते कवोष्णमिति कवं चोष्णे इति कुशब्दस्य कवा
देशः कोष्णं कवोष्णं मंदोष्णं कदुष्णं त्रिषु तद्वतीत्यमरः ॥६७॥ सोहमिति ॥ इज्याया गः सुयज्ञो भिः वेकाविति कापः इज्या यागविशुद्धात्मा विशुद्धचेतः प्रजा
लोपेन संतत्यभावेन निमीलितः कृतनिमीलनः सोहं लोकालोक इति लोकः नु लोकालोक इत्यलोकः लोकश्चालोकश्चेति लोकश्चासावलोकश्चेति
वा लोकालोकश्चक्रवालोऽचलइव लोकालोकश्चक्रवालइत्यमरः प्रकाशते इति प्रकाशो देवऋणविमोचनात् न प्रकाशते इत्यप्रकाशः पितृ

त्ययैवं चिंत्यमानस्य गुरुणा ब्रह्मयोनिना सानुबंधाः कथं नस्युः संपदो मे निरापदः ॥६४॥ किंतु वध्वां तवैतस्यामदृष्टसदृशप्रजाम् ॥ नमामवति सद्वीपार
त्नसूरपि मेदिनी ॥६५॥ नूनं मत्तः परं वंश्याः पिंडविछेददर्शिनः ॥ न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥६६॥ मत्परं दुर्लभं मत्वा नूनमावर्जितं मया ॥
पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥६७॥ सोहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ॥ प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥६८॥
लोकांतरसुखं पुण्यं तपोदानसमुद्भवं संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥६९॥ तया हीनं विधातर्मां कथं पश्यन्न दूयसे ॥ सिक्तं स्वयमिवा स्नेहाद्वंध्यम्

ऋणाविमोचनात् पचाद्यच् अस्मीति शेषः लोकालोकोप्येतः सूर्यसंपर्कादहिस्तमोव्याप्तेश्च प्रकाशश्चाप्रकाशश्चेति मंतव्यं ॥६८॥ ननु तपोदानादि
संपन्नस्य किमपत्यैरित्यत्राह ॥ लोकांतरेति ॥ समुद्भवोस्मादिति समुद्भवः कारणं तपसा दानेन समुद्भवो यस्य तत्तपोदानसमुद्भवं पुण्यं लोकांत
रे सुखं सुखकरं तथाहि शुद्धवंशे भवा वंश्या संततिश्च परत्र परलोके इह चामुत्र च लोके शर्मणे सुखाय शर्म शातसुखानि चेत्यमरः भवतीति शेषः
॥६९॥ तयाहीनमिति ॥ हे विधातः स्रष्टः तया संतत्या हीनं शून्यमपत्यं मां स्नेहादाश्रमवृक्षं स्वयमेव सिक्तं जलसेचनवर्धितं वंध्यं फले वंध्योऽफलोऽव
केशी चेत्यमरः आश्रमोचितं केदारको तमभि वपश्यन् कथमेव न दूयते न परितप्यसे विधातरित्यनेन समर्थोपि वेत्तास इति गम्यते ॥७०॥ असह
मिति हे भगवन् असंतं ऋणं पैतृकमृणं अनिर्वाणस्य मज्जनरहितस्य निर्वाणो निर्वृतो मोक्षे विनाशे गजमज्जने इति यादवः दंतिनो गजस्य अरुंतुदं मर्म
तुदतीति अरुंतुदः मर्मस्पृक् व्रणमिवमरुंतुदः क्लीबे अरुंतुदस्तु मर्मस्पृगित्यमरः विधुरबंधुरसुदइतिखश् ॥ प्रत्ययः अरुषि द्विषदिति मुमागमः

आलानेगजबंधनेस्तंभमिव आलानंगजबंधनमित्यमरः असह्यासोढुमशक्यापीडादुःखं यस्मिंस्तदवेहि दुःसहं दुःखजनकं विद्धि इत्यर्थः नि
र्वाणोत्थानशयनानिर्वाणिगजचमोक्षोति कालकाव्या ।७१। तस्मादिति ॥ हेतात तस्मात्त्वेत्थकारेण यथा मुच्येमुक्तोभवामि कर्मणि लुट् तथा
संविधातुकर्तुमर्हसि यस्मात्कारणादिक्ष्वाकूणां इक्ष्वाकुवंश्यानां तत्रजातानां दुष्प्रापेणे लुकुते यांदुरापे दुःप्रापेर्थे सिद्धयस्त्वदधीनास्त्वदा
यत्ताः इक्ष्वाकूणामिति शेषेषष्ठी न लोकेत्यादिना कृद्योगेषष्ठीनिषेधात् ॥७२॥ इतीति ॥ इति राज्ञा विज्ञापितः ऋषिः ध्यानेन स्तिमितेलो
चनेयस्य सः ध्यानस्तिमितलोचनः निश्चलाक्षः सन् क्षणमात्रं सुप्तमीनो ह्रद इव तस्थौ ॥७३॥ सोपश्यदिति ॥ स मुनिः प्रणिधानेन चित्तैका-
ग्र्येण भावितात्मा शुद्धांतःकरणः भुवोभर्तुर्नृपस्य संततेः स्तंभकारणं संतानस्तंभकारणे प्रतिबंधकारणमपश्यत् अथानंतरमेनं नृपंप्र
त्यबोधयत् स्वहृंसज्ञापितवानित्यर्थः एनमिति गतिबुद्धीत्यादिकर्तुः कर्मत्वम् ॥७४॥ पुरेति ॥ पुरा पूर्वं शक्रमिंद्रमुपस्थायसंसेव्य उर्वीं प्रति
मुद्दिश्य यास्यतो गमिष्यतस्तव पथि कल्पतरुच्छायामाश्रिता सुरभिः कामधेनुरासीत् तत्र स्थितेत्यर्थः ॥७५॥ ततः किमित्यत आह ॥ धर्मलोपे

असह्यपीडं भगवन्नृणमंत्यमवेहि मे ॥ अरुंतुदमिवालानमनिर्वाणस्य दंतिनः ॥७१॥ तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि ॥ इ
क्ष्वाकूणां दुरापेर्थे त्वदधीना हि सिद्धयः ॥७२॥ इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ॥ क्षणमात्रमृषिस्तस्थौ सुप्तमीन इवा
ह्रदः ॥७३॥ सोपश्यत्प्रणिधानेन संततेः स्तंभकारणं ॥ भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥७४॥ पुरा शक्रमुपस्थाय तवोर्वीं
प्रति यास्यतः ॥ आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥७५॥ धर्मलोपभयाद्राज्ञीमृतुस्नातामनुसंस्मरन् ॥ प्रदक्षिणक्रियार्हायां
तस्यां त्वं साधु नाचरः ॥७६॥ अवजानासि मां यस्मादतस्ते न भविष्यति ॥ मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥७७॥ स शापो न त्व
या राजन्न च सारथिना श्रुतः ॥ नदत्याकाशगंगायाः स्रोतस्युद्दामदिग्गजे ॥७८॥

ति ॥ ऋतुः पुष्पं रज इति यावत् ऋतुः स्त्रीकुसुमेपि चेत्यम
रः ऋतुस्नातां राज्ञीमुद्दिश्य धर्मस्य ऋतुभिगमनलक्षणस्य लोपाद्भयाद्यस्माद्भयात्तामनुसंस्मरन् ध्यायन् नृपं गोदैवतविप्रघृतमधुचतुष्पथेप्र
दक्षिणानि कुर्वीत विज्ञातांश्च वनस्पतीनिति शास्त्रात् प्रदक्षिणक्रियार्हायां प्रदक्षिणीकरणयोग्यायां तस्यां धेन्वां त्वं साधु प्रदक्षिणादिसत्कारं ना
चरः नाचरितवानसीति यास्मरन् हि विस्मरंतीति भावः ऋतुकालाभिगमने मनुः ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदेति प्रकरणदोषमाह
पराशरः ऋतुस्नातां तु यो भार्यां स्वस्थः सन्नोपगच्छति बालगोघ्नापराधेन विध्यते नात्र संशय इति ॥७६॥ अवजानासीति ॥ यस्मात्कारणान्मामव
जानासि तिरस्करोषि अतः कारणान्मत्प्रसूतिं संततिमनाराध्यासेवयित्वा ते तव प्रजा न भविष्यतीति सुरभिस्त्वां शशाप शप्तवती ॥७७॥ स

स्रोतस्युद्दामदिग्गजे नदत्याकाशगंगायाः [illegible] ॥
राजन्न [illegible] सारथिना [illegible] तः ॥७८॥

नं० ६८१८

रघुवंश

३० पत्राणि

अपूर्ण

कर्ता –

व्याख्याता –

मल्लिनाथ

रघुवंशमल्लिनाथी टीका सहित षष्ठसर्ग प. १५

॥श्री गणेशाय नमः॥ जाह्नवी मूर्ध्नि पादे वा कालः कंठे वपुष्यथ । कामारिं कामतातं वा कंचिदेकं भजामहे ॥ स इति । सोऽजस्तत्र स्थाने उपचारव
त्सु राज्ञोपचारवत्सु मंचेषु पर्यंकेषु सिंहासनस्थान् मनोज्ञवेषान् मनोहरवेषान् वैमानिकानां विमानैश्चरतां चरतीति ठक् इत्यर्थः मरुता
ममराणां मरुतो पवनाम[?]रावित्यमरः । आकृष्ट[?]लीलान् सौभा[?]ग्यान् आकृष्टमहत्लीलानित्यर्थः । सावेदस्ते विगमकृत्वा समा
सः नरलोकं पालयन्तीति नरलोकपालाः कर्मण्यण् तान् नृपालान् अपश्यत् १ रतेरिति रतिः स्मरप्रिया याः वरांगे च सुरते स्मरतो

स तत्र मंचेषु मनोज्ञवेषान् सिंहासनस्थानुपचारवत्सु वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् १
रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वांगमिवेश्वरेण । काकुत्स्थमालोकयतां नृपाणां मनो बभूवेंदुमतीनिराशं २ वैदर्भ
निर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन [?]मंचं शिलाविभंगैर्मृगराजशावस्तुंगं नगोत्संगमिवारुरोह ३ राम ॥३॥

इति विश्वः रतेः कामप्रियायाः गृहीतानुनयेन स्वीकृतप्रार्थनेन गृहीतरनुनयेनेत्यर्थः सावदिति विगमकृत्वा समासः ईश्वरेण हरेण प्रत्य
र्पितं [?]स्वांगं कामं मिव स्थितं काकुत्स्थमजं आलोकयतां नृपाणां मनः इंदुमतीनिरा[?]शं निःस्पृहं बभूव इंदुमती सत्पतिमेनं विहाय नान्य
न्वारिष्यतीति निश्चिकुरित्यर्थः सर्वातिशयं सौंदर्यमस्येति भावः २ वैदर्भेति असौ कुमारो वैदर्भेण भोजेन निर्दिष्टं प्रदर्शितं मंचं पर्यंकं
क्लृप्तेन सोपानपथेन मृगराजशावः सिंहपोतः पोतोऽर्भकोडिंभः पृथुकः शावकः शिशुरित्यमरः शिलानां विभंगैर्भंगीभिः तुंगमुन्नतं नगो
त्संगं [?]शैलाग्रमिव आरुरोह ॥३॥॥

परार्ध्येति परार्ध्याः श्रेष्ठा वर्णा नीलपीतादयो यस्य तेनास्तरणेन कंबलादिना उपपन्नं संगतं केवलं रत्नवद्रत्नखचितमासनं सिंहासनमासेदिवान् अधिष्ठितवान् सोजः मयूरपृष्ठाश्रयिणा गुहेन सेनान्या सह । सेनानीरग्निभूर्गुह इत्यमरः भूयिष्ठमत्यर्थमुपमेयकांतिरासीत् मयूरपृष्ठस्य विचित्रत्वात् साम्यं रत्नासनस्य तद्वाराजकुमारयोरपीति भावः ४ तास्विति सर्वातिशायित्वेनोन्मितया श्रिया लक्ष्म्या कांत्या पयोमुचां मेघानां पंक्तिषु मेघपंक्तिषु विद्युदेव सहस्रधा विभक्तः तरंगेषु तरणिरिव स्वयमेक एव प्रत्येकं संक्रामित इत्यर्थः प्रभाविशेषस्य उदयेनाविर्भावेन दुर्निरीक्ष्यः ।

परार्ध्यवर्णास्तरणोपपन्नमासेदिवान् रत्नवदासनं सः । भूयिष्ठमासीदुपमेयकांतिर्मयूरपृष्ठाश्रयिणा गुहेन ।४। तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः । सहस्रधात्मा व्यरुचद्विभक्तः पयोमुचां पंक्तिषु विद्युतेव ।५। तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये । रराज धाम्ना रघुसूनुरेकः कल्पद्रुमाणामिव

दुर्दर्शः आत्मा स्वरूपं व्यरुचत् बभौ तिष्ठतपुर्भ्यो लुङ् इति परस्मैपदं द्युतादित्वादङ्प्रत्ययः तस्मिन् समये प्रत्येकं संक्रांतलक्ष्मीकस्तया तेषां किमपि दुरासदं तेजः प्रादुरासीदित्यर्थः । तेषामिति । महार्हसिंहासनसंस्थितानामुदारनेपथ्यभृतामुज्ज्वलवेषधारिणां राज्ञां मध्ये कल्पद्रुमाणां सुरतरूणां मध्ये पारिजातः सुरद्रुमविशेष इव पंचैते देवतरवो मंदारः पारिजातकः । संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनमित्यमरः । रघुसूनुरेकः धाम्ना तेजसा रराज भ्राजेतीति पाठे अतिशायेनेत्यर्थः । अत्र कल्पद्रुमशब्दः पंचान्यतमाविशेषवचनः उपकल्पयंतीति मनोरथानिति व्युत्पत्त्या सुरद्रुममात्रोपलक्षकस्तथा प्रयुक्त इत्यभिसंधेयं कल्पा इति द्रुमाः कल्पद्रुमा इति विग्रहः । ६ । ॥ ॥

नेत्रेति पौरजनस्य नेत्रव्रजाः सर्वान्नृपतीन्विहाय तस्मिन्नजे निपेतुः स एव सर्वोत्कर्षेण ददृशे इत्यर्थः कमिव मदोत्कटे मदे
नोद्भिन्नगंडे तिर्भ्रमरदेवावन्ये गंधद्विपे गंधप्रधाना निद्विपे गजे रेचिता रिक्तीकृताः पुष्पा लताद्ध्वायैस्ते सत्सु पुष्पवृक्षादि इत्यर्थः
द्विरेफा भृंगा इत्यर्थः द्विरेफा भृंगा इतिपुष्पवन्यविशेषणं द्विरेफाणां पुष्पं वृक्षं त्यागसंभावनार्थं कितम् ७ अथेति पुरेति मनु
ष्येति त्रिभिर्विशेषकमाह अथान्वयज्ञैः राजवंशाभिज्ञैः वंदिभिः स्तुतिपाठकैः। वंदिनः स्तुतिपाठकाः इत्यमरः। सोमा
र्कवंश्ये सोमसूर्यवंशसंभवे नरदेवलोके राजलोके राज्ञां समूहे स्तुते सति कन्या मंचांतर राजमार्गे विवेशे त्युत्तरेण
नेत्रव्रजाः पौरजनस्य तस्मिन् विहाय सर्वान्नृपतीन्निपेतुः। मदोत्कटे रेचितपुष्पवृक्षा गंधद्विपे वन्य इव द्विरेफाः। ७।
अथ स्तुते वंदिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके। संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयंतीः। ८।
पुरोपकंठोपवनाश्रयाणां कलापिनामुद्धतनृत्यहेतौ। प्रध्मातशंखे परितो दिगंतान्तूर्यस्वने मूर्च्छति मंगलार्थे। ९।
मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि। विवेश मंचांतरराजमार्गं पतिंवरा कॢप्तविवाहवेषा। १०। विशेषकं।
न्वयः। एवमुत्तरत्रापि योज्यं। संचारिते समंतात्प्रचारिते अगुरुसारः सारनिर्यासो योनिः कारणं यस्य तस्मिन् धूपे वैजयं
तीः पताकाः समुत्सर्पति अतिक्रम्य गते सति। ८। पुरेति किंच पुरस्योपकंठे समीपे उपवनान्याश्रयो येषां ते षां कलापिनां बर्हिणां
उद्धतनृत्यहेतौ मेघध्वनिसादृश्यात् तांडवकरणे प्रध्माताः मुखमारुतेन पूरिताः शंखा यस्मिन् मंगलार्थे मंगलप्रयोजके तूर्य
स्वने वाद्यघोषे परितः दिगंतान्मूर्च्छति सति व्याप्नुवति सति। ९। मनुष्यवाह्यमिति पतिं वृणोतीति पतिंवरा अथ पतिंव
रा स्वयंवरा चेत्यमरः। संज्ञायां भर्तृवृजित्यादिना खच्प्रत्ययः कॢप्तविवाहवेषा कन्या इंदुमती मनुष्यैर्वाह्यं परिवारेण परिवार
जनेन शोभितं समं चतुरस्रयानं चतुरस्र... आरुह्य मंचांतरं मंचमध्ये यो राजमार्गस्तं विवेश। १०। ॥

तस्मिन्निति नेत्रपाता नामे कलक्ष्ये एकदृश्ये कन्यामये कन्यारूपे तस्मिन् विधातुर्विधानातिशये स्वष्टिविशेषे नरेंद्राः अंतःकरणैर्निपेतुः आसनेषु देहैः केवलं देहैरेव स्थिताः देहानपि विस्मृत्य तत्रैव दत्तचित्ता बभूवुरित्यर्थः। अंतःकरणकर्तृके निपतने नरेंद्राणां कर्तृत्वव्यपदेश आदरातिशयादित्यर्थः।२१। तामिति। तामिंदुमतीं अति प्रभिव्यक्तमनोरथानां प्ररूढाऽभिलाषिणां महीपतीनां राज्ञां प्रणयाग्रदूत्यः प्रणयप्रार्थना प्रेम च प्रणयस्त्वमी विश्रंभयाञ्चाप्रेमाणां इत्यमरः प्रणये व्यंग्यदूत्यः प्रथमदूतिकाः प्रणयः प्रकाशकत्वसाम्यात् दूतीत्वे व्यपदेशः विविधाः शृंगारचेष्टाः शृंगारविकाराः पादपानां प्रवालशोभाः पल्लवक्षेपद इव बभूवुः उत्पन्नं अत्र शृंगारलक्षणं रसालोकां कुसुधाकरे विभावैरनुभावैश्च सोचितैर्व्यभिचारिभिः नीतास्वादरूपस्त्वं रतिः शृंगार उच्यते रतिरिष्टाविशेषः तच्चोक्तं

तस्मिन् विधानातिशये विधातुः कन्यामये नेत्रशते कलक्ष्ये। निपेतुरंतःकरणैर्नरेंद्रा देहैः स्थिताः केवलमासनेषु।२१।
तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः। प्रवालशोभा इव पादपानां शृंगारचेष्टा विविधा बभूवुः।२२। क
श्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं। रजोभिरंतः परिवेषबंधि लीलारविंदं भ्रमयांचकार।२३।

तत्रैवा पुनोरन्योन्यविषयस्थायिनीच्छा रतिः। स्मृतेति चेष्टाशब्देन तदनुभावविशेषा उच्यते तावित तत्रैवोक्ता भावमनोगतं साक्षात् स्वहेतुं व्यंजयंति यते नुभावा इति व्याख्याता भ्रूविक्षेपश्स्मितादयः ते च तुर्द्धा विशांतते वाक्वपुरं रंभसभवा इति तत्र गात्रारंभभवान् चेष्टाशब्देनोक्त्वा तनुभावात्कश्चिदित्यादिभिः श्लोकैर्वक्ष्यति शृंगाराभासप्रख्यायं एकत्रप्रतिपादनात्। तदुक्तं। एकत्रैवानुरागश्चेतिय कश्चिदोगतोपि वायोबिता बहुशक्तिश्चेद्रसाभासास्त्रिधा मतइति शृंगारचेष्टा बभूवुरित्युक्तं ता एव दर्शयति।२२। कश्चिदिति कश्चिद्राजा करांभ्यां पाणिभ्यां उपगूढनालं गृहीतदंडं आलोलैश्चलैः पत्रैरभिहतास्ताडिताः द्विरेफा भ्रमरा येन तत्तथोक्तं रजोभिः परागैरंतः परिवेषमंडलं बध्नातीति तं तः परिवेषबंधि लीलारविंदं भ्रमयांचकार करस्थलीलारविंदवत्त्वयाहं भ्रामि तव इतिनृपाशयः। हस्तधूर्त्तकोयमपलक्षणकदनीदमगाजिप्राय:।२३। ॥ ॥ ॥

विस्रस्तमिति विलासनशीलो विलासी वोकषलसकस्यस्तंभ इति घिनुण्प्रत्ययः अपरो राजा अंसात्स्कन्धात् विस्रस्तं चलितं रत्नानुविद्धं
रत्नखचितं यदंगदं केयूरं तस्य कोटिलग्नं प्रलंबिनीम् ऋजुलंबिनी स्रजं प्रालंबम् ऋजुलंबि स्यात् इत्यमरः प्रावारं पाठे उत्तरीयव
२ स्त्रं उत्क्षिप्य उद्धृत्य साचीकृतं यत्र तेन कृतं चारुवक्त्रं यस्य स तथोक्तः सन् यथावकाशं स्वस्थाने निनाय प्रावारोत्क्षेपणे व्याजेनाहं
त्वामेव पश्यामीति नृपाभिप्रायः गोपनीयं किंचिदंगेऽस्ति तयोर्ये प्रकटयतु ते इतीन्दुमत्याशयः ।१४। आकुंचितेति । ततः पूर्वोक्ता
३ त्परोन्यो राजा किंचित्समावर्जितनेत्रशोभी ईषद्वक्रीकृतितनेत्रशोभी सन् आकुंचिता आभुग्ना वक्रा अग्रांगुली यो यस्य तेन
तिर्यग्विसर्पिन्नखप्रभायस्य तेन च तथोक्तः पादेन हैमीं हिरण्मयीं पीठं विलिलेख लिखितवान् पादांगुलीनां आकुंचितेन

विस्रस्तमंसादपरो विलासी रत्नानुविद्धांगदकोटिलग्नं । प्रावारमुत्क्षिप्य यथाप्रदेशं निनाय साचीकृतचारुवक्त्रः ।१४।
आकुंचिताग्रांगुलिना ततोऽन्यः किंचित्समावर्जितनेत्रशोभी । तिर्यग्विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठं ।१५।
निवेश्य वामं भुजमासनार्द्धे तत्संनिवेशादधिकोन्नतांसः । कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् ।१६।

मत्समीपे आगच्छेति नृपाभिप्रायः । भूमिविलेखको यमपलक्षणक इतीन्दुमत्याशयः । भूमिविलेखनं लक्ष्मीविनाशहेतुः ।
१५। निवेश्येति । कश्चिद्राजा वामं भुजं आसनार्द्धे सिंहासनैकदेशे निवेश्य संस्थाप्य तत्संनिवेशं तस्य वामभुजस्य संनिवेशाद
वस्थापनादधिकं उन्नतो वामांस एव यस्य स तथोक्तः सन् सः विवृत्ते परावृत्ते त्रिके त्रिकप्रदेशे भिन्नहारः लुंठितहारः सन् पृ २
ष्ठवंशाधरे त्रिकं इत्यमरः सुहृत्समाभाषणतत्परोऽभूत् वामपार्श्ववर्तिना मित्रेण संभाषितुं प्रवृत्त इत्यर्थः । अत एव विवृत्ते
त्रिकत्वं घटते त्वया वामांगे निवेश्य तया सह एवं कर्तास्मि इति नृपाभिप्रायः । परं दृष्ट्वा परांमुखायं न कार्यकर्त्ता
इतीन्दुमत्याशयः ।१६। ॥ ॥ ॥ ॥ ॥ ॥

विलासिनी। विभ्रमदंतपत्रमापांडुरं केतकपत्रमन्यः। प्रियानितंबोचितसन्निवेशैर्विपाटयामास युवा नखाग्रैः। १७।

विलासीति अन्यो युवा विलासिन्याः प्रियाया विभ्रमार्थं दंतपत्रं दंतपत्रमिव तं आपांडुरं केतकगर्भवर्हि केतकदलं केतकदलोपि वर्हमित्य
मरः प्रियानितंबेषु चितैः सन्निवेशैः अभ्यस्तानिर्स्तेपरलैर्नखाग्रैर्विपाटयामास विदारयामास अहंतु तव नितंबे एवं नखव्रणादीन्
दास्यामीति निगूढाशयः। तत्र छेदकेवृत्तपत्रपाटकोयमपलक्षणकइतीदुमत्याशयः। १७। कुशेशयेति कश्चिद्राजा कुशेशयं शतपत्र
मिव आताम्रं तलं यस्य तेन शतपत्रं कुशेशयमित्यमरः रेखारूपो ध्वजाया लांछनं यस्य तेन करेण अंगुलीषु भवानि अंगुलीया
नि ऊर्मिका अंगुलीयकमूर्मिके त्यमरः जिह्वामूलांगुले छ इति छ प्रत्ययः रत्नानामंगुलीयानि तेषां प्रभया अनुविद्धा
न्त्संप्राप्तान् अक्षान् देवनाकितवाक्षे त इत्यमरः सलीलं उदीरयामास उच्चैः क्षेप अहं त्वयासह एवं रंस्ये इति निगूढाशयः

कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलांछनेन। रत्नांगुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान्। १८।
कश्चिद्यथाभागमवस्थितेपि स्वसन्निवेशाद्व्यतिलंघिनीव। वज्रांशुगर्भांगुलिरंध्रमेकं व्यापारयामास करं किरीटे। १९।
ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी। प्राक्सन्निकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत्सुनंदा। २०।

अत्रचातुर्यकोपुरुषोऽयं इतीदुमत्याशयः। अस्तैर्मदीव्यतीति श्रुतिनिषेधात्। १८। कश्चिदिति। कश्चित्कामी यथाभागं यथास्था
नं अवस्थितेपि स्वसन्निवेशाद्व्यतिलंघिनीव स्वस्थानाच्चलितइव किरीटे वज्रांशूनां किरीटगतानां अंशवो गर्भे येषां तानि अंगुलीरं
ध्राणि यस्य तमेकं करं व्यापारयामास चपलतात्वात् अलंकारः आत्मनः प्रकारेण पराचेष्टा च पलास्त्वा तो किरीटवत्समारि
रःस्थितामपि त्वां भारं न मन्ये इति निगूढाशयः। शिरसि न्यस्तहस्तोयमघलक्षणशोकयुक्त इतीदुमत्याशयः। १९। ततो इति। ततो
नृपाणां श्रुतवृत्तवंशा श्रुतनृपवृत्तवंशेत्यर्थः। सा वेदितत्वे पि गमकत्वान्नसमासः प्रगल्भा वाग्मिनी सुनंदाख्या प्रतीहारं रक्षती
ति प्रतिहाररक्षी द्वारपालिका कर्मण्यण्। टिड्ढाणञ् इत्यादिना ङीप् प्राक् प्रथमं कुमारीमिंदुमतीं मगधेश्वरस्य सन्निकर्षं समी
पं नीत्वा पुंवत् पुंसा तुल्यं तेन तुल्यमित्यादिना वतिप्रत्ययः अवदत्। २०।   ॥   ॥   ॥   ॥

असाविति। असौ राजा असाविति पुरोवर्त्तिनीनिर्देशः एवमुत्तरत्रापि द्रष्टव्यः शरणोन्मुखानां शरणार्थिनां शरण्यो रक्षणे समर्थः त
त्र साधुरिति यत्प्रत्ययः। शरणं भवितुमर्हः शरण्य इति नाथनिकाक्तिर्निर्मूलैव अगाधसत्त्वो गंभीरस्वभावः। सत्त्वं गुणे पिशा
४ चादौ बले द्रव्यस्वभावयोरिति विश्वः। मगधा जनपदास्तेषु प्रतिष्ठा आस्पदं यस्य सः मगधप्रतिष्ठः प्रतिष्ठा कृत्यमास्पद
मित्यमरः। प्रजारंजनेन लब्धं वर्णो विचक्षणः। यद्वा प्रजारंजनेन लब्धोत्कर्षः। परान् शत्रून् तापयतीति परंतपः। परंतपाख्यः
५ द्विषत्परयोस्तापेरिति खच् खचि ह्रस्व इति ह्रस्वः अरुर्द्विषदजन्तस्य मुमिति मुमागमः। नामेति प्रसिद्धौ यथार्थनामा श

असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः। राजा प्रजारंजनलब्धवर्णः परंतपो नाम यथा
र्थनामा।२१। कामं नृपाः संतु सहस्रशोन्ये राजन्वतीमाहुरनेन भूमिं। नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती
चंद्रमसैव रात्रिः।२२।

क्रूरसंतापनादिति भावः।२१। काममिति। अन्ये नृपाः कामं सहस्रशः संतु भूमिमनेन राजन्वतीं शोभनराजन्वतीं
आहुः नेतादृशाः कश्चिदस्तीत्यर्थः। सुराज्ञि देशे राजन्वान् स्यात्ततोन्यत्र राजवान् इत्यमरः। राजन्वान् सौराज्य इति
निपातनात्साधुः। तथाहि। नक्षत्रैरश्विन्यादिभिस्ताराभिः साधारणैर्ज्योतिर्भिः ग्रहैर्भौमादिभिश्च संकुलापि रात्रिः चंद्रमसैव ज्यो ४
तिरस्यास्तीति ज्योतिष्मतीत्यर्थः। नान्येन ज्योतिष्मतीत्यर्थः।२२।

क्रियेति ॥ अयं परंतपोऽध्वराणां क्रतूनां क्रियाप्रबंधादनुष्ठानसातत्यात् । अविच्छिन्नादनुष्ठानादित्यर्थः । अजस्रमनि
त्यं आहूतसहस्रनेत्रः सन् चिरं शच्या अलकान् पांडुकपोलयोर्लंबान् स्रस्तान् पचाधच । मंदारैः कल्पद्रुमकुसुमैः
शून्यांश्चकार प्रोषितभर्तृका हि केशसंस्कारान्न कुर्वंति प्रोषिते मलिना कृशेति स्मरणादिति भावः । क्रीडां शरीरसंस्का
रं समाजोत्सवदर्शनं हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृकेति स्मरणात् ॥ २३ ॥ अनेनेति ॥ वरेण्येन वरणीयेन वृणो
तेरौणादिक एन्यप्रत्ययः । अनेन राज्ञा गृह्यमाणं पाणिमिच्छसि चेत् । पाणिग्रहणमिच्छसि चेदित्यर्थः । प्रवेशे प्रवेशकाले प्रा

क्रियाप्रबंधादयमध्वराणामजस्रमाहूतसहस्रनेत्रः । शच्याश्चिरं पांडुकपोललंबान् मंदारशून्यानलकांश्चकार ।
२३ । अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे । प्रासादवातायनसंस्थितानां नेत्रोत्सवं पुष्पपुरांगनानां ।
२४ । एवं तयोक्ते तमवेक्ष्य किंचिद्विस्रंसिदूर्वांकमधूकमाला । ऋजुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमा
णा ॥ २५ ॥ तां सैव वेत्रग्रहणे नियुक्ता राजांतरं राजसुतां निनाय । समीरणोत्थेव तरंगलेखा पद्मांतरं मानसराजहंसीं ॥ २६ ॥

सादवातायनं संश्रितानां राजभवनगवाक्षस्थितानां पुष्पपुरांगनानां पाटलिपुत्रांगनानां नेत्रोत्सवं कुरु सर्वोचितामानां तासा
मपि दर्शनीयो भविष्यतीति भावः ॥ २४ ॥ एवमिति ॥ एवं तया सुनंदयोक्ते सति तं परंतपमवेक्ष्य किंचिद्विस्रंसिनी दूर्वांका दूर्वा
चिह्ना मधूकमाला गुडपुष्पमाला यस्याः सा । मधूके तु गुडपुष्पमधुद्रुमावित्यमरः । वरणे शिथिलप्रयत्नेति भावः । तन्वी इंदुमती
एवं नृपमभाषमाणा ऋजुप्रणामक्रिययैव प्रत्यादिदेश परिजहार ॥ २५ ॥ तामिति ॥ सेवनान्या चित्तज्ञत्वादिति
भावः । वेत्रग्रहणे नियुक्ता दौवारिकी सुनंदा तां [illegible] द्विकर्मकः । कथमिव समीरणोत्थया वातोत्थया
ना तरंगलेखा ऊर्मिपंक्तिः समानसे सरसि या राजहंसी तां पद्मांतरमिव ॥ २६ ॥

जगादेति एनामंहुमतीजगाद किमिति अथ मंगनाथोऽगारेशाधीश्वरः सुरांगनाभिः प्रार्थिता कामिता यौवनश्रीर्यस्य स
तथोक्तः पुरा किलैनमिंद्रसहायार्थं इंद्रपुरगामिनं अकामयतेति ऽस्य रसः प्रसिद्धिः। किंच। सूत्रकारैः गजशास्त्रविद्भिः पा
लकादिभिः महर्षिभिर्विनीतनागः शिक्षितगजः किलेत्यैतिह्ये अत एव भूमिगतोपि ऐंद्रपदं ऐश्वर्यं भुंक्ते भूलोक एव स्व
५ र्गसुखमनुभवतीत्यर्थः। गजा असुरादेवर्षिसे अन्यानीतैर्देवर्षिभिः पालिते नरशास्त्रेण गजानवशीकृत्य भुवि संप्रदायं प्र
5 वर्त्तयदिति कथा गीयते। ३७। अनेनेति शत्रुविलासिनीनां स्तनेषु मुक्ताफलस्थूलतमान् अभ्रूविलोडन अभ्रूविंदून्

जगाद चैनामथ मंगनाथः सुरांगनाप्रार्थितयौवनश्रीः। विनीतनागः किल सूत्रकारैरैंद्रंपदं भूमिगतोपि भुंक्ते।
३७। अनेन पर्यश्रयताऽश्रुविंदून् मुक्ताफलस्थूलतमान्स्तनेषु। प्रत्यर्पिताः शत्रुविलासिनीनामाक्षिप्य सूत्रेण वि
नैव हाराः। ३८। निसर्गभिन्नास्पदमेकसंस्थमस्मिन् द्वयं श्रीश्च सरस्वती च। कांत्या गिरा सूनृतया च योग्या त्व
मेव कल्याणि तयोस्तृतीया। ३९।

अश्रू अश्रूणीति विश्वः। पर्यश्रयत प्रस्तारयत। ताभर्तृवधादिति भावः। अनेनांगनाथेनोन्मुच्याक्षिप्य सूत्रेण विना हारा ए
व प्रत्यर्पिताः अविच्छिन्नाश्रुप्रवर्त्तनात्सूत्रहारार्पणमेव कृतमिवेत्युत्प्रेक्षावगम्यते। ३८। निसर्गेति। स्वभावतो भि
न्नाश्रयं सहावस्थानविरोधीत्यर्थः। श्रीः सरस्वती चेति द्वयमस्मिन्नंगनाथे एकस्मिन्संस्था स्थितिर्यस्य तमेकसंस्थं ५
उभयमिह संगतमित्यर्थः। हे कल्याणि बह्वादिभ्यश्चेति ङीप् कांत्या सूनृतया सत्यप्रियया गिरा च योग्या संसर्गार्हत्व
मेव तयोः श्रीसरस्वत्योः तृतीया समानगुणयोः युवयोः दांपत्यं युज्यत एवेति भावः। इति नायकत्वं चास्य ध्वन्यते।
तदुक्तं। तुल्येनैकत्र दाक्षिण्येनेति। ३९।

अथेति अथ कुमारी अंगराजाच्चक्षुरवतार्य अपनीयेत्यर्थः। जन्यां मातृसखीं सुनंदां याहि गच्छ इत्यवदत्। अथवा जन
नीं वधूं वहंतीति जन्याः जन्या वधूबंधवः तान्वा गच्छेत्यवदत्। जन्या मातृसखी मुदः जन्याइव वधूजाति प्रियं तु
ल्या हितेषि चेति पक्षद्वये चेति विश्वः। अथवा जन्या वधूभृत्याः भृत्याश्चापि नवोढा इति केशवः। संज्ञायां जन्या इति य
त्प्रत्ययांतो निपातः। यदाह वृत्तिकारः। जनीं वधूं वहंतीति जन्या जामातुर्वयस्या इति यच्चामरः। जन्याः स्निग्धा वर
स्य ये चेति तत्सर्वमुपलक्षणार्थमित्यविरोधः। न चायमंगराजनिषेधो दूषणपरोक्षान्नाप्यदृष्टदोषादित्यादिनाह असावं

अथांगराजादवतार्य चक्षुर्याहीति जन्यामवदत्कुमारी। नासौ न काम्यो न च वेद सम्यक् द्रष्टुं न सा भिन्नरुचिर्हि
लोकः।३०। ततः परं दुःप्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभूमौ। निदर्शयामास विशेषदृश्यमिंदुं नवोत्था
नमिवेंदुमत्यै।३१। अवंतिनाथोयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः। आरोप्य चक्रभ्रममुष्णतेजास्त्व
ष्ट्रेव यत्नोल्लिखितो विभाति।३२।

गराजः काम्यः कमनीयो नेति न किंतु काम्य एवेत्यर्थः। सा कुमारी वस
म्यक् द्रष्टुं विविक्तुं न वेदेति न वेदेत्यर्थः। किंतु लोको जनो भिन्नरुचिर्हि कश्चिदेकमपि किंचित्कस्मैचिन्न रोचते किं कुर्मां
न हि दृष्टानियंतुं शक्यत इत्यर्थः।३०। तत इति। ततोऽनंतरं प्रतीहारभूमौ द्वारदेशे नियुक्ता दौवारिका स्त्री द्वारं प्रतीहारमि
त्यमरः। द्विषद्भिः शत्रुभिः दुःप्रसहं दुःसहं नृपं राजानमित्यर्थः। विशेषेण दृश्यं दर्शनीयं रूपं रूपवत इत्यर्थः। परमन्यं नृपं नवोत्थानं न
वोदयमिंदुमिव इंदुमत्यै निदर्शयामास।३१। अवंतीति उदग्रबाहुः दीर्घबाहुर्विशालवक्षाः। तनुवृत्तमध्यः कृशवर्तुलमध्यो यं
राजा अवंतिनाथः अवंतिदेशाधीश्वरः त्वष्ट्रा विश्वकर्मणा भर्तृतेजो वेगमसहमानया दुहित्रा संज्ञादेव्या प्रार्थितेनेति शेषः।
चक्रभ्रमं चक्राकारं शस्त्रोत्तेजनं यंत्रं भ्रमोंबुनिर्गमे भ्रांते कुंदमालेपि च यंत्रके इति विश्वः। आरोप्य यत्नोल्लिखितः उष्णतेजाः सूर्य

६ अस्येति समग्रशक्तेः शक्तित्रयसंपन्नस्यावंतीनाथस्य प्रयाणेषु यानान्यग्रेसरैर्वाजिभिरश्वैरुत्थितानि रजांसि सामंतानां राज्ञां
येशिखामणयः चूडामणयस्तेषां प्रभारोहस्तमयं तेजो कुर्वन्तां कुर्वंतिनासीरेवास्य शत्रवः पराग्नीयंत इतिभावः।२३।अ
सावितिअसाववंतिनाथः महाकालं नाम स्थानविशेषः तदेव निकेतनं स्थानं यस्य तस्य चंद्रमौलेः ईश्वरस्यादूरे समी

6

अस्य प्रयाणेषु समग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानि। कुर्वंति सामंतशिखामणीनां प्रभा
प्ररोहास्तमयं रजांसि।२३। असौ महाकालनिकेतनस्य चंद्रार्द्धमौलेर्निवसन्नदूरे। तमिस्त्र
पक्षेपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान्।२४।

पे वसन्। अत एव हेतोस्तमिस्त्रपक्षे कृष्णपक्षेपि प्रियाभिः सह ज्योत्स्नावतः प्रदोषान् रात्रीर्निर्विशत्यनुभव
ति किल नित्यज्योत्स्नाविहारत्वमेतस्यैव नान्यस्येति भावः।।२४।। ॥ ॥ ॥ ६

अनेनेति रंभे कदलीस्तंभाविव [illegible] वद् ऊरू यस्याः सा रंभोरूस्तस्याः संबोधनं हे रंभोरु वहह जनर पदादौ यस्याह्
न्यूङः प्रत्ययः नदीत्वाद्ध्रस्वः हजागेन पार्थिवे [illegible] न सह शिप्रानाम तत्र त्या नदी तस्यास्तरंगाणामनि[illegible]लेन के
ऊँमस्तौच पितासु उद्यानानां परंपरासु पंक्तिषु विहर्तुं ते तव मनसो रुचिः कच्चित् स्पृहास्ति किमित्यर्थः । अभिवंगे स्पृहा
यांच रुचिः स्त्रीयामित्य[illegible]मरः ।२५। तस्मिन्निति उत्तमसौ कुमार्या [illegible] । उत्कोंगमा

अनेन यूना सह पार्थिवेन रंभोरु कच्चिन्मनसो रुचिस्ते । शिप्रातरंगानिलकंपितासु विहर्तुमुद्यान
परंपरासु ।२५। तस्मिन्नभिद्योतितबंधुपद्मे प्रतापसंशोषितशत्रुपंके । बबंध सा नोत्तमसौ
कुमार्या कुमुद्वतीभानुमतीव भावं ।२६।

इवासौ इंदुमती कुमुद्वतीवाभिद्योतितानि उल्लसितानि बंधुरूपाण्येव पद्मानि येन तस्मिन् प्रतापेन संशोषिताः शत्रव
एव पंकाः कर्दमा येन तस्मिन्नवंतिनाथे कुमुद्वती कुमुदन इंदुवंसेभ्योऽद्भुतत्वम् । भानुमत्याश्च मतीव भावं चित्तं
न बबंध न तत्रानुरागमकरोदित्यर्थः । बंधूनां पद्मत्वेन शत्रूणां पंकत्वेन च निरूपणेन राज्ञः सूर्यसाम्यम् ।२६।।

तामिति सुनंदा तामरसांतराभां पद्मोदरतुल्यकांतिं कनकगौरीमित्यर्थः। गुणैरनूनामधिकामित्यर्थः। शोभ
नादंता यस्याः सा सुदती पक्षिदंतस्य दत्रिति दत्रादेशः। अगतश्चेति नीयतां प्रापितां वा वधातुर्ललिताक्षरबिंबं मधु
रनिर्माणस्त्रियं इत्यर्थः अनुगता आपो येषु ये नूपा नाम देशाः ऊरवयूरवूः यथामानत्ते इत्यप्प्रत्ययः
समासांतः ऊदनोर्देशे इत्यूदादेशः तथाराज्ञोनूपराजस्यांगतो विधाय व्यवस्थाप्य भूपः पुनर्जगाद।३७।

तामग्रतस्तामरसांतराभामनूपराजस्य गुणैरनूनां। विधाय सृष्टिं ललितां विधातुर्जगाद भूयः सु
दतीं सुनंदा।३७। संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः। अनन्यसाधारणराजश
ब्दो बभूव योगी किल कार्तवीर्यः।३८।

संग्रामेति संग्रामेषु युद्धेषु निर्विष्टा अनुभूताः सहस्रं बाहवो यस्य स तथोक्तः युद्धादन्यत्र द्विभुज एव इ
त्यर्थः। अष्टादशसु द्वीपेषु निखाताः स्थापिताः यूपा येन स तथोक्तः सर्वक्रतुयाजी सार्वभौमश्चेति भावः। जरायु
जादिसर्वभूतरंजनादनन्यसाधारणराजशब्दो यस्य स तथोक्तः योगी ब्रह्मविद्वानित्यर्थः। स किल भगवतो दत्ता
त्रेयाल्लब्धयोग इति प्रसिद्धिः। कृतवीर्यस्यापत्यं पुमान् कार्तवीर्यो नाम राजा बभूव किलेति अयं चास्य मह
िमा सर्वोपि दत्तात्रेयप्रसादलब्ध इति भारते दृश्यते।३८।

अकार्येति विनेता शिक्षकोयः कार्त्तवीर्यः अकार्यस्यासत्कार्यस्य चिंताया अहं चौर्यादिकं करिष्यामीति बुध्याः समकालमेव यथातत्
याः पुरस्तादग्रे चापधरः प्रादुर्भवन्सन्प्रजानां प्रजा स्यात्संततौ जनेऽत्यमरः अंतःशरीरेषु अंतःकरणेषु शरीरशब्देनेंद्रियेल
क्ष्यते अविनयमपि प्रत्यादिदेश मानसापराधमपि निवारयसेत्यर्थः अन्ये तु वाक्कायापराधमात्रप्रतिहंत्रीति भावः॥३९॥ ज्यावं
धेति ज्यायां मौर्व्यां बंधनेन बंधननिस्पंदा निश्चेष्टा भुजा यस्य तेन विनिश्वसंती ज्यावंधोपरोधादीर्घं निश्वसंती वक्त्रपरंपरा
दशमुखी यस्य तेन निर्जितवासवेनेंद्रविजयिना अत्रेंद्रोदयोपमेनेन जितप्रायादिति भावः लंकेश्वरेण दशास्येन परस्य
कार्त्तवीर्यस्य कारागृहे बंधनागारे कारा स्याद्बंधनालय इत्यमरः आप्रसादमनुग्रहपर्यंतं उषितं स्थितं नपुंसके भावे क्तः

अकार्यचिंतासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् अंतःशरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता॥३९॥ ज्या
बंधनिष्पंदभुजेन यस्य विनिश्वसद्वक्त्रपरंपरेण कारागृहे निर्जितवासवेन लंकेश्वरेणोषितमाप्रसादात्॥४०॥ तस्या
न्वये भूपतिरेष जातः प्रतीप इत्यागमवृद्धसेवी येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टम्॥४१॥ एतम्

एतत्प्रसाद एव तस्या मोक्षोपायो न तु शात्रवमिति भावः॥४०॥ तस्येति आगमवृद्धसेवी प्रतीप इति शेषः एष भूपतिस्तस्य कार्त्त
वीर्यस्यान्ववाये वंशे जातः येन प्रतीपेन संश्रयस्याश्रयस्य पुंसो दोषैर्व्यसनादिभिः रूढमुत्पन्नं श्रियः संबंधि स्वभावलोला
प्रकृतिचंचलेत्येवंरूपमयशो दुःकीर्तिः प्रमृष्टं निरस्तं दुष्टाश्रयत्यागशीलायाः श्रियः प्रकृतिचापलं प्रमादोन्मत्तजनपरि
कल्पितमित्यर्थः अयं तु दोषराहित्यान्न कदाचिदपि त्यज्यत इति भावः॥४१॥ राम

५ ५ ५ ५

आयोधन इति यः प्रतीपः आयोधने युद्धे कृष्णगतिं कृष्णवर्त्मानम् अग्निं सहायमवाप्य क्षत्रियाणां कालरात्रिं संहाररात्रिम्
इत्यर्थः रामपरश्वधस्य जामदग्न्यपरशोः द्वयोः कुठारो स्वधितिः परशुश्च परश्वधः इत्यमरः शितां तीक्ष्णां धारां मुखाग्रादीनां च
निशितमुखे धारा प्रकीर्तितेति विश्वः उत्पलपत्रस्य सार इव सारो यस्यास्तां तथाभूतां संभावयति मन्यते एतन्नगरि जिगीषया।
आगतान् रिपून् स्वयमेव घ्नन्नासीति भगवतो वैश्वानरेण दत्तवरो यः राजा इदं श्रुत्वा तथागताः शत्रव इति भारते कथानुसंधेया ४२
अस्यामिति दीर्घबाहोरस्य प्रतीपस्यांके लक्ष्मीर्भव वल्लितं हरिणीक्षेत्यर्थः अनेनायं विष्णुतुल्य इत्युक्तं माहिष्मती नामास्य नगरी तस्याः व
प्रः प्राकार इव नितंबः तस्याः कांचीरसनाभूतो जलानां वेण्याः प्रवाहेन रम्यां ओघः प्रवाहो वेणीचेति हलायुधः रेवां नर्मदां प्रासादजालैः

आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिं। धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसाराम्॥४२॥ अस्यांकलक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीवप्रनितंबकांचिं। प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः॥४३॥ तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव। शरत्प्रमृष्टांबुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः॥४४॥ राम

गवाक्षैः जालसमूहे आनाये गवाक्षके जालकस्त्रियामित्यमरः प्रेक्षितुं कामः इच्छास्ति यदि ४३ तस्याः इति प्रकामं प्रियं प्रीतिकरं दर्शनं यस्य सः सोपि दर्शनीयोऽपीत्यर्थः स क्षितीशः शरदा प्रमृष्टांबुधरोपरोधः निरस्तमेघावरणः पर्याप्तकलः संपूर्णकलः शशी नलिन्या इव तस्या इंदुमत्या रुचये न बभूव रुचिं नाजीजनत् इत्यर्थः लोको भिन्नरुचिरिति भावः ४४ नारायणाय नमो नमः॥

सा शूरेति लोकांतरस्वर्गादावपि गीतकीर्तिमाचारेण शुद्धयोरुभयोर्वंशयोर्मातापितृकुलयोः दीपं प्रकाशकं उभयवंशे स्वत्रोभयपक्षत्वव निर्वा
हः शूरसेनानां देशानामधिपतिं सुषेणं नाम नृपतिमुद्दिश्याभिसंधाय शुद्धांतरस्था ग्रंतःपुरपालिक्रयाकर्मण्य लट्ठि डेति डीप् सा कुमारी जगदे
४५ नीपेति यज्वा विधिवदिष्टवान् सुपतो क्वनिप् एष पार्थिवो नीपानामन्वयो यस्येति नीपान्वयः नीपवंशजः यं सुषेणमाश्रित्य गुणैः ज्ञान
मौनादिभिः शांतैश्च सत्वैः सिद्धाश्रममेकं यथा आश्रमे त्वाश्रमपसत्वैर्गजसिंहादिभिः प्राणिभिरिव नैसर्गिकः स्वाभाविकोपि परस्परेण विरोधः उत्ससृजे त्यक्तः
४६ यस्येति हिमांशोः कांतिः शुभ्रं द्युकिरण इव कलिं पापं तं घाति खंडयतीति कलिंदः तस्य कन्याः नयनयोरभिरामा यस्य सुषेणस्य कांतिः शोभा यो
त्मगेहे स्वभावेन सन्निविष्टा संक्रांता शुचि विषह्यं विषोढुमशक्यं तेजः प्रतापस्तु हर्म्याग्रेषु संरूढास्तृणांकुरा येषु तेषु शून्यत्वेषु विस्तृतेषु रिपुमंदिरे
षु शत्रुनगरेषु मंदिरं नगरे गृहे यिति विश्वः सन्निविष्टः स्वजनाह्लादकारी बभूव न परस्यैवेति भावः ॥४७॥ यस्येति यस्य सुषेणस्य वा रि विहारकाले ज

सा शूरसेनाधिपतिं सुषेणमुद्दिश्य लोकांतरगीतकीर्तिं आचारशुद्धोभयवंशदीपं शुद्धांतरस्था जगदे कुमारी।४५। नीपान्वयः पार्थिव
एष यज्वा गुणैर्यमाश्रित्य परस्परेण सिद्धाश्रमं शांतमिवैत्य सत्वैर्नैसर्गिकोप्युत्ससृजे विरोधः ४६ यस्यात्मगेहे नयनाभिरामा कांतिर्हि
मांशोरिव सन्निविष्टा हर्म्याग्रसंरूढतृणांकुरेषु तेजोविषह्यं रिपुमंदिरेषु ।४७। यस्यावरोधस्तनचंदनानां प्रक्षालनाद्वारिविहारकाले क
लिंदकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव भाति।४८। त्रस्तेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः वक्षःस्थलव्यापिरुचं दधानः
सकौस्तुभं ह्रेपयतीव कृष्णं ॥४९॥

लक्रीडासमये ऽवरोधानामंतःपुरांगनानां स्तनेषु चंदनानां मलयजानां प्रक्षालनाद्धेतोः कलिंदो नाम शैलः कलिं पापं द्यति खंडयतीति कलिंदः तस्य
कन्या यमुना कालिंदी सूर्यतनया यमुना समन स्वसा इत्यमरः मथुरायां गतापि गंगाम्भावेस्त्वच यंत्यपि शब्दः कालिंदीतीरे मथुरा लवणासुरवधकाले शत्रुघ्नेन नि
र्मीयते इति वचनात् तत्कथमधुना मथुरासंभव इति चिंत्यं मथुरा मधुरा पुरी तिशब्दभेदे यदाह सामान्येति मथुरानामा स्पराह्वा नगरी गता पि गं गाया विश
कृष्टापीत्यर्थः गंगाया भागीरथ्या ऊर्मिभिः संसक्तजले विभाति धवलचंदनसंसर्गात् गंगायोगाद्गत्वा गंगासंगेव भातीत्यर्थः सितासितेति द्विगंगायमुनेति शेष
पदः॥४८॥ त्रस्तेनेति तार्क्ष्यात् गरुडात् त्रस्तेन यमुनाओकः स्थानं यस्य स तेन कालियेन नागेन विसृष्टं किल अभयदाननिष्क्रयत्वेन दत्तं किल मणिमिति स्ववक्षःस्थलव्यापिरुचम
णिं दधानो यः सुषेणः सकौस्तुभं कृष्णं विष्णुं ह्रेपयति व्रीडयतीव लज्जयतीव अगृहीतादिनायुगागमः कौस्तुभं मणिमणिर पुरुषे शोयं मणि रिति भावः॥४९॥

~~नयेति यद्यनुजिघ्वासि किंकरीतुं न हानुजिघ्वासि किंकरी नाम इति हे सानुधः श्रेमहाशिलेदमुजं कै दूलकुवा दुःसानि रारा तुप सोदि विकिमा राहु बलतुनर्नि हे गंगमदंत~~
~~मकालिंगनार्थं सामेतुयी आत नयनवालेंदुतुदी ... मिमिवं दुमतीपिमादेचर~~ संभाव्येति युवानमनुसुवेलं भर्तारं संभाव्य मत्वा पतिमत्वनोगी कत्येन
९ र्थः मद्दुभवाला लोत्तराउपरि प्रस्तारितकोमलदलवाः पुष्पशय्याय स्मिं चैत्ररथा त्कुवेरोद्यानादन्यूने वृंदावने हे सुंदरि यौवनश्रीः यौवनफलं नि
र्विश्यतां भुज्यतां ५० अध्यास्येति किंच प्राह इति वर्षा सुकांता सुगोवर्द्धनस्याद्रेः कंदरा सुंदरीषु दरी तु कंदरो वा स्त्री त्यमरः अंभसः इव तैर्वि
१ दुभिः ऽसिक्तानि सिक्तानि शिलेव शैलेयं शिलातं तु शैलेयमिति पादद्यः यद्वाशिलातु व्याख्य औषधिविशेषः कालानुसार्य वृद्धाश्मपुष्पशीतशि

संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तर पुष्पशय्ये वृंदावने चैत्ररथादनूने निर्विश्यतां सुंदरि यौवनश्रीः ।५०। अध्यास्य चांभः ष्टप
षतोक्षितानि शैलेयगंधीनि शिलातलानि कलापिनां प्रावृषि पश्य नृत्यं कांतासु गोवर्द्धनकंदरासु ।५१। नृपं तमावर्त्तमनोज्ञनाभिः सा
व्यत्यगादन्यवधूर्भवित्री महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ।५२। राम ॥॥

वानि तु इत्यमरः शिलापाठः इत्यत्राशिलायाः इतियोगविभागादिवार्थः प्रत्ययः षढं धवं तिशैलेयं गंधातिशिलातलान्याध्यास्याधिष्ठाय कलापिनां वर्हिणां
नृत्यं पश्य ५१ नृपमिति स्यादावर्त्तोंभसां भ्रम इत्यमरः आवर्त्त इव मनोज्ञा नाभिर्यस्याः सा इदं च नदीसाम्यार्थमुक्तं अन्यवधूरन्यपत्नी भाविनी भावि
विनी सा कुमारी तं नृपं सागरगामिनी सागरंगंत्री स्रोतोवहा नदी मार्गवशादुपेतं प्राप्तं महीधरं पर्वतमिव व्यत्यगात् अतीत्यगाता ५२ ८

रघुवंशमल्लिनाथीटीकासहितसप्तमसर्गप॰

॥श्रीगणेशाय नमः॥ भजे महेन्द्रियामैकं मुहुरन्यपयोधरं। मामंतिवकिमालोक्याश्वासयंतौ हि दंपती।१। अथ विदर्भनाथो भोजः सहदृशे
नयोग्येनोपयंत्रा वरेण युक्तां तां अतएव साक्षात् प्रत्यक्षं। साक्षात्प्रत्यक्षतुल्ययोरित्यमरः। स्कंदेन युक्तां देवसेनामिव देवपुत्रीं स्कं
दपत्नीतामिव स्थितां। स्वसारं भगिनीमादाय गृहीत्वा पुरप्रवेशाभिमुखो बभूवाभूत् उपजातिः छंदोऽस्मिन् सर्गे।१।
सेनेति भोजस्य राज्ञो गोत्रापत्यं स्त्री भोज्या तामिंदुमतीं प्रति व्यर्थमनोरथत्वात् रूपेषु आकृतिषु वेषेषु नेपथ्ये
षु च साभ्यसूयाः इर्ष्येति निंदंतः। किंच विभाते प्रातःकाले येन गृहाश्च दयश्चव मंदभासः क्षयिवीति धातुः नृपाश्च

अथोपयंत्रा सहदृशेन युक्तां स्कंदेन साक्षादिव देवसेनां। स्वसारमादाय विदर्भनाथः पुरप्रवेशाभि
मुखो बभूव।१। सेनानिवेशान् पृथिवीक्षितोऽपि जग्मुर्विभातग्रहमंदभासः। भोज्यां प्रति व्यर्थमनोरथ
त्वाद्रूपेषु वेषेषु च साभ्यसूयाः।२। सांनिध्ययोगात्किल तत्र शच्याः स्वयंवरक्षोभकृतामभावः। का
कुत्स्थमुद्दिश्य समत्सरोऽपि शशाम तेन क्षितिपाललोकः।३।

पि सेनानिवेशान् शिविराणि जग्मुः।२। ननु कुत्र थ्यश्चे युध्यतां तत्राह सांनिध्येति तत्र स्वयंवरस्थले शच्या इं
द्राण्याः संनिधिरेव सांनिध्यं तस्य योगात् तद्भावात् हेतोः स्वयंवरस्य क्षोभकृतां विघ्नकारिणामभावः
किलेति स्वयंवरविघातकाः शच्या विनाशं तत्त्वागमेत्तत्त्वनार्थः तेन हेतुना काकुत्स्थम् अजं उद्दिश्य सम
त्सरोऽपि सवैरोऽपि क्षितिपाललोकः शशाम नायुध्यत।३।

तावदिति यावत्तावच्च साकल्य इत्यमरः। तावत्प्रकीर्णः साकल्येन प्रस्तारिताः अभिनवाः उपचाराः पुष्पप्रकारादयो यस्य तत्तथोक्तं इन्द्रायुधवद्द्योतितानि प्रकाशितानि तोरणानि अंकानि चिह्नानि यस्य तं ध्वजानां छाया इति ध्वजच्छाया छाया बाहुल्यादिति नपुंसकत्वं तेन निवारितं उष्णं आतपो यस्य तं राजमार्गं स वरः वोढा वध्वा सह प्राप विवेश ।४। तत इति ततस्तदनन्तरं तदा तस्मिन्समये चामीकरजालवत्सु सौवर्णगवाक्षयुक्तेषु सौधेषु तस्याजस्यावलोकने तत्पराणां आसक्तानां पुरसुन्दरीणां इत्थं वक्ष्यमाणं त्यक्त्वान्यकार्याणि केशा

तावत्प्रकीर्णाभिनवोपचारमिन्द्रायुधद्योतिततोरणांकं। वरः स वध्वा सह राजमार्गं प्राप ध्व
जच्छायनिवारितोष्णम् ।४। ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु। बभूवुरि
त्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि ।५। आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वे
ष्टनवान्तमाल्यः। बद्धुं न संभावित एव तावत्करेण रुद्धोपि हि केशपाशः ।६।

बंधादीनि येषां तानि विचेष्टितानि व्यापाराणि बभूवुः ।५। तान्येवाह पंचभिः श्लोकैः। आलोकेति सहसा आलोकमार्गं प्रति व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः उद्वेष्टनेन बंधविश्लेषेण लोलानि माल्यानि द्रुतचलितवशादुन्मुक्तबंधनः अत एव वांतमाल्यः उज्झितमाल्यः चयः करेण रुद्धोपि गृहीतोपि केशपाशः केशकलापः पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः तावदालोकप्राप्तिपर्यन्तं बद्धुं बंधनाय न संभावितः न चिंतितः ।६।

॥प्रसाधिकेति काचित्प्रसाधिकया अलंकर्त्र्या आलंबितं रंजनार्थं धृतं द्रवरागमेव अग्रं चासौ पादश्चेत्यग्रपा
द इति समानाधिकरणे कर्मधारयसमासः हस्ताग्रं हस्तयोर्गुणगुणिनोर्भेदाभेदाभ्यामिति वामनः। तमा
क्षिप्य आकृष्य उत्सृष्टलीलागतिः त्यक्तमंदगमना सती आ गवाक्षात् गवाक्षपर्यंतं पदवीमलक्तकांकां ला
क्षारागचिह्नां ततान चकार ।७। विलोचनमिति अपरा स्त्री दक्षिणं विलोचनं अंजनेन संभाव्य अलंकृ
त्य संभ्रमादिति भावः तद्वंचितं तेनांजनेन वंचितं वामनेत्रं यस्याः सा तथैव शलाकामंजनकर्णिकां वहं

प्रसाधिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव। उत्सृष्टलीलागतिरागवाक्षादलक्तकां
कां पदवीं ततान ।७। विलोचनं दक्षिणमंजनेन संभाव्य तद्वंचितवामनेत्रा। तथैव वातायनसंनिकर्षं
ययौ शलाकामपरा वहंती। ८। जालांतरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न ववंध नीवीं। नाभिप्रविष्टा
भरणप्रभेण हस्तेन तस्थाववलंव्य वासः।९।

ती सती वातायनसंनिकर्षं गवाक्षसमीपं ययौ दक्षिणग्रहणं संभ्रमात् व्युत्क्रमकरणद्योतनार्थं सव्यसम्भ
क्षिप्रं वर्मनुष्या अंजनमिति श्रुतेः ।८। जालेति अन्या स्त्री जालांतरप्रेषितदृष्टिः सती प्रस्थाने गमनेन भिन्नां
त्रुटितां नीवीं वसनग्रंथिं नीवी परिपणे ग्रंथौ स्त्रीणां जघनवाससीति विश्वः। न ववंध किंतु नाभिप्रविष्टा आ
भरणानां कंकणादीनां प्रभा यस्य तेन प्रभैव नाभेराभरणमभूदिति भावः। हस्तेन वासोऽवलंब्य गृहीत्वा त
स्थौ ।९।

अर्द्धेति सत्वरमुत्थितायाः कस्याश्चित् अर्द्धाचिता मणिभिरर्द्धगुंफिता दुर्निमितेति विसंभ्रमात् अ...प्र
डुमिञ् प्रक्षेपणे इति धातोः कर्मणि क्तः पदे पदे प्रतिपदं वीप्सायां द्विभावः गलंती गलद्वासती रशना मेखला
तदानीं अंगुष्ठमूलेऽर्पितं सूत्रमेव शेषो यस्याः सा आसीत् ।१०। तासामिति तदानीं सांद्रकुतूहलानां तासां
स्त्रीणां आसवगंधोगर्भैर्येषां तैः विलोलनेत्राण्येव भ्रमराः येषां तैर्मुखैः व्याप्तांतरा घनान्नावकाशाः गवाक्षाः
सहस्रपत्राभरणा इवासन् कमलालंकृता इवास्थिता इत्यर्थः सहस्रपत्रं कमलमित्यमरः ।११। ताः नार्यो

अर्द्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलंती । कस्याश्चिदासीद्रशना तदानीमंगुष्ठमूला
र्पितसूत्रशेषा ।१०। तासां मुखैरासवगंधगर्भैर्व्याप्तांतराः सांद्रकुतूहलानां । विलोलनेत्रभ्रमरै
र्गवाक्षाः सहस्रपत्राभरणा इवासन् ।११। ता राघवं दृष्टिभिरापिबंत्यो नार्यो न जग्मुर्विषयांतराणि ।
तथा हि शेषेंद्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ।१२

रघोरपत्यं राघवं अजं तस्यापत्यमित्यण् प्रत्ययः दृष्टिभिरापिबंत्यो अतितृष्णया पश्यंत्यो विषयांतराणि का
र्यांतराणि ततोऽन्यविषयान्न जग्मुः न विविदुरित्यर्थः । तथा हि आसां नारीणां शेषेंद्रियवृत्तिः श्रोत्रादि इं
द्रियवृत्तिः सर्वात्मना स्वस्वरूपकार्त्स्न्येन चक्षुः प्रविष्टेव श्रोत्रादीनीन्द्रियाणि स्वार्थं त्वेन ग्रहणशक्तेः च
क्षुरेव प्रविश्य कौतुकात् स्वस्वयमप्येन स्वयमुपलभंते किमुतान्यथा स्वविषयाभिगमः किं न स्यादिति भावः ।१२।

स्र एवंकथा इति वक्ष्यति ताः कथयति स्थानामित्यादिभिस्त्रिभिः श्लोकैः भोज्या इन्दुमती परोक्षैरदृष्टैर्भूपतिभिः
ह ता मैवेयं ममैवेयमिति प्रार्थितापि स्वयंवरमेव साधु हितममंस्त मेने न तु परोक्षमेव किंचित्प्रार्थिकं वव्रयत
२ तत्स्थाने युक्तमेवैतत् युक्ते देशे प्रतं स्थानविष्वमित्यमरः कुतः अन्यथा स्वयंवराभावे सा इन्दुमती पद्ममस्या
३ स्तीति पद्मा लक्ष्मीः अर्शआदिभ्योऽजित्यच प्रत्ययः नारायणं विष्णुमिवात्मतुल्यं स्वानुरूपं कान्तं पतिं न लभेत न लभते
व तदन्तर्हि विवेकाभावो काव्यादिति भावः ॥१२॥ परस्परेणेति स्पृहणीयशोभं सर्वाशास्यसौन्दर्यमिदं द्वन्द्वं मिथुनं
द्वंद्वं रहस्येत्यादिना निपातः परस्परेण नायोजयिष्यच्चेत् न योजयेद्यदिति प्रजानां पत्युर्विधातुरस्मिन्द्वये द

स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या । पद्मेव नारायणमन्यथासौ लभेत कान्तं क
थमात्मतुल्यम् ॥१३॥ परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् । अस्मिन्द्वये रूपविधानय
त्नः पत्युः प्रजानां वितथोऽभविष्यत् ॥१४॥ रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथा हि बाला । गतेयमा
त्मप्रतिरूपमेव मनो हि जन्मान्तरसंगतिज्ञम् ॥१५॥

यो रूपविधानयत्नः सौन्दर्यनिर्माणप्रयासो वितथो वि
तथाभविष्यत् एतदनुरूपस्त्रीपुंसनिर्माणाभावादिति भावः । लिङ्निमित्ते लङ् क्रियातिपत्ताविति लङ् ॥१४॥ रतीति
रतिस्मरौ यौ नित्यसहचरावित्यभिप्रायः नूनं तावेव इयं च अयं च इमौ दम्पती एतद्रूपेणोत्पन्नौ कुतः तथा हि प्रसिद्धमे २
वैतत् यदियं बाला राज्ञां सहस्रेषु मध्ये सत्स्वपि वाल्याकारणे इति भावः । आत्मप्रतिरूपं स्वतुल्यमेव भर्तारं तु अल्पस
काप्यनीकोमणः प्रतिरूपका इत्याह इन्दुमती प्राप्तेति तदपि कथं जातमत आह मनो हि जन्मान्तरसंगतिज्ञमिति अय
मर्थः तदेवेदमिति प्रतिभिज्ञाविशेषाभावेऽपि वासनाविशेषवशादनुभूतार्थेषु मनः प्रवृत्तिरस्तीत्युक्तं जन्मान्तरसाहचर्यमे
वानुप्रवर्तकामित्यर्थः ॥१५॥

ह। तीति इतिस्थाने हते स्या पुल्लप्रकारेण पौरवधूमुखेभ्यः उद्गताः उत्पन्नाः श्रोत्रयोः सुखाः मधुराः मुखवाक्यानि विशि
ष्यानि [redacted] धृष्य अत्र निःकुत्सु इत्ये पापं पुण्यं सुखानि चेत्यमरः कथाः गिरः एवं कुमारो अजो मंगलसंवंधाभिः
मंगलरचनाभिः उद्भासितं शोभितं संबंधिनः कन्यादायिनः पद्मसद्म प्राप। १६। ततइति ततोनंतरं करेणुकायाः
हस्तिन्याः सकाशात् आशु शीघ्रं अवतीर्य कामरूपेश्वरदत्तो हस्तो येन सो अजः वैदर्भेण भोजेन निर्दिष्टं कथितं नारीणां म
नांसीवांतःपुरे चतुष्कं चतुःशालं विवेश प्राविशत्। १७। महेति महार्हे बहुमूल्ये सिंहासने स्थितो सावजः भोजेन उपनीतं

दत्तमुद्गताः पौरवधूमुखेभ्यः एवं कथाः श्रोत्रसुखाः कुमारः। उद्भासितं मंगलसंविधाभिः संबंधि
नः स पद्मसमाससाद। १६। ततोवतीर्याशु करेणुकायाः सकामरूपेश्वरदत्तहस्तः। वैदर्भनिर्दिष्टमथो
विवेश नारीमनांसीव चतुष्कमंतः। १७। महार्हसिंहासनसंस्थितोसौ सरत्नमर्घ्यं मधुपर्कमिश्रं। भोजो
पनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः। १८। दुकूलवासाः सवधूसमीपं निन्ये विनीतैरवरोध
दक्षैः। वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चंद्रपादैः। १९।

रत्नैः सहितं सरत्नं मधुनापच्यते इति मधुपर्कः तेन मिश्रं अर्घ्यं पूजासाधनद्रव्यं दुकूलयोः क्षौमयोर्युग्मं च वनिता
कटाक्षैः अन्यस्त्रीणां मायांग दर्शनैः सार्धं जग्राह गृहीतवान् मूल्ये पूजाविधावर्घ्यमित्यमरः। अर्घार्थं पूजा
विधये इदमर्घ्यं पादार्घाभ्यां चेति यत्प्रत्ययः। १८। दुकूलेति दुकूलं क्षौमं वासः आच्छादनं यस्य सोऽजः विनीतैः
नम्रैः अवरोधरक्षैः अंतःपुररक्षकभृत्यैः वधूसमीपं निन्ये नीतः तत्र दृष्टांतः स्फुटाः प्रकटाः फेनराजिः
फेनपंक्तिः यस्य स उदन्वान् समुद्रः नवैर्नूतनैश्चंद्रपादैश्चंद्रकिरणैर्वेलासमीपमिव तद्दृष्टांतोपमः। १९।।

तत्रेति तत्र सद्मनि अर्चितः पूजितोऽग्निकल्पोऽग्नितुल्यो भोजपतेः पुरोधा पुरोहितः। पुरोधास्तु पुरोहित इत्यमरः। आज्यादि
भिर्द्रव्यैः अग्निं हुत्वा तमेवाग्निं विवाहसाक्ष्ये चाधाय साक्षिणं कृत्वेत्यर्थः वधूवरौ संगमयांचकार योजयामासेत्य
४ र्थः। २०। हस्तेनेति स राजसूनुः हस्तेन वध्वा इंदुमत्याः हस्तं परिगृह्य अनंतरायाः संनिहितायाः अशोकलतायाः प्र
वालं पल्लवं प्रतिगतेन पल्लवेन स्वीयेन प्राप्य चूत आम्र इव सुतरां चकाशे। २१। आसीदिति वरः कंटकितः प्रकोष्ठो
करो यस्य स आसीत् तस्य अग्रे तु इत्यशोकौ च समहर्षे च कंटक इत्यमरः कुमारी इंदुमती स्विन्नाः स्वेदांचिता अंगुलयो यस्याः
सा तथावद्वृते वभूव — अर्पोत्प्रेक्षते तस्मिन्द्वये अजेंदुमतीरूपे मिथुने तत्क्षणं तदानीं आत्मवृत्तिः स्वविकोदय

तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः। तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संग
मयांचकार। २०। हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकाशे। अनंतराशोकलताप्रवा
लं प्राप्येव चूतः प्रतिपल्लवेन। २१। आसीद्वरः कंटकितः प्रकोष्ठः स्विन्नांगुलीः संववृते कुमारी।
अस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन। २२।

रूपा वृत्तिः मनोभवेन कामेन समं विभक्तेव पृथक्कृतेव अस्यार्द्धस्य पाठांतरे ताभ्यां पाणिसमागमेन पाण्योः
संस्पर्शेन कर्त्रा तयोर्वधूवरयोर्मनोभवस्य वृत्तिर्व्याप्तिः समं विभक्तेव समीकृतेवेत्यर्थः प्राकृस्ति इत्याप्यनु ४
रागस्य साम्यं संप्रतितत्कार्यदर्शनात् पाणिसंस्पर्शकृतमुत्प्रेक्षते अत्र वात्स्यायनः कामयितुः प्रथमसमागमे
स्विन्नांगुलिः स्विन्नमुखी च भवति पुरुषस्तु रोमांचितो भवेत् एभिरनयोर्भावं परिक्षितेति क्षिते स्त्रीपुरुषयोः स्वेदरो
मांचाभिधानं सात्त्विकोक्तिमात्रोपलक्षणं न तु प्रातिनियमो विवक्षितः एभिरिति बहुवचनसामर्थ्यादेव सति कुमारसंभ
वे रोमोद्भवः प्रादुरभूत् उमायाः स्विन्नांगुलिः पुंगवकेतुरासीदिति पुंकेमवचनेन न दोषो भवति। २२। ७

तयोरिति अपांगेषु नेत्रप्रांतेषु प्रतिसादितानि प्रवर्त्तितानि निष्क्रियचलो निरीक्षणयोः समापत्तायद्दृष्टे यासंगत्यानिवर्त्ति
तानि आकृतानि अन्योन्याभिमन्लोलानि सतृष्णानि लोलं चलसतृष्णयोरित्यमरः तयोर्द्दिदृक्षो विलोचनानि
मनोज्ञारम्यांह्रियानिमीलितेनयंत्रणं संकोचमानशिरेप्रापुः ।२३। प्रदक्षिणेति तन्मिथुनमुदर्चिषउन्नतज्वा
लस्य कृशानोर्वह्नेः प्रदक्षिणीकरणं चकासेदिदीपे कथमिव मेरोः कनकाचलस्यउपान्ते समीपेदिनकरभूमिषु
वर्त्तमानं मेरोः प्रद। तच्छीकुर्वद्दित्यर्थः अन्योन्यसंसक्तं संगतं मिथुनस्यापि तद्विशेषणं अहस्त्रियामा च अह

तयोरपांगप्रतिसादितानि क्रियासमापत्ति निवर्तितानि ह्रीयंत्रणमानशिरेमनोज्ञामन्योन्य
लोलानि विलोचनानि ।२३। प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे । मेरोरुपांते
विवर्तमानमन्योन्यसंसक्तमहस्त्रियामं ।२४। नितंबगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन
तेन । चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ ।२५।

त्रियामं रात्रिंदिवमिव समाहारे द्वंद्वैकवद्भावः ।२४। नितंबेति नितंबेन गुर्वी अलघ्वी दुर्धरा लघुनो गुर्वी
तिङ्णश्चतः । विधातृप्रतिमेन ब्रह्मतुल्येन तेन गुरुणा याजकेन प्रयुक्ता जुहुधीति नियुक्ता शिखिज्वाला
करे मौलौ शिखां तमौलिषु हविर्हव्ये घृते तोये हेतौ कांचनवेतसात्ति वैजयंती मत्तचकोरस्येव नेत्रे
यस्याः सा लज्जावती सा वधूरग्नौ लाजान् विसर्गं चिकार ।२५। ॥ ॥ ॥

हविरिति शिखाज्वाला करे मौलौ लिशिखा शाखायां तमौलिषु । हविर्हव्ये घृते तोये हे तौ कांचन वेतसी इति वैज
यंती हविषः आज्यादेः शमीपल्लवानां लाजानां च गंधोऽस्यास्तीति तत्तथोक्तः शमीपल्लवमिश्रान्लाजान्
अंजलीनां जलावावपतीति कात्यायनः पुण्यो धूमः कृशानोः पावकउदियाय उदतिष्ठत् कपोलयोः
५ संसर्पिणी प्रसरणशीला शिखाऽग्रभागो यस्य स तथोक्तः स धूमः तस्याः वध्वाः मुहूर्तं कर्णोत्पलतां क
र्णेंदीवरभूषणत्वं प्रपेदे ।२६। तदिति तत्वधूमुखं आचारेण प्राप्तात् धूमग्रहणात् अंजनस्य क्लेदने अंजनमिश्र

हविःशमीपल्लवलाजगंधी पुण्यः कृशानोरुदियाय धूमः । कपोलसंसर्पिशिखः स तस्या मुहूर्त-
कर्णोत्पलतां प्रपेदे ।२६। तौ स्नातकैर्बंधुमता च राज्ञा पुरंध्रिभिश्च क्रमशः प्रयुक्तं । कन्याकुमारौ
कनकासनस्थावार्द्राक्षतारोपणमन्वभूतां ।२८। तदंजनक्लेदसमाकुलाक्षं प्रम्लानबीजांकुरक
र्णपूरं । वधूमुखं पाटलगंडलेखमाचारधूमग्रहणाद्बभूव ।२७।

वाष्पोदकमिश्रणं तेन समा
कुलेऽक्षिणी यस्य तत् तत्समाकुलाक्षं बीजान्निर्गताः अंकुराः बीजांकुराः प्रम्लाना बीजांकुरा एव कर्णपूरोऽव
तंसो यस्य तत् पाटलगंडलेखा कपोलभित्तिर्यस्य तत् पाटलगंडलेखं स्वमरुणगंडस्थलं बभूव । अन्ये द्वाचाराद्धूमग्र
हणमाहुः ।२७। ताविति कनकासनस्थौ तौ कन्याकुमारौ स्नातकैर्गृहस्थविशेषैः स्नातकस्त्वाप्लुतो व्रतीत्यमरः । बं ५
धुमता बंधुपुरःसरेणेत्यर्थः राज्ञा च पुरंध्रिभिः पतिपुत्रवतीभिर्नारीभिश्च क्रमशः प्रयुक्तं स्नातकादीनां पूर्वपूर्वं वैज्ये
ष्ठ्यात् क्रमेण कृतमार्द्राक्षतानामारोपणमन्वभूतां त्रिविधा हि स्नातकाः विद्यास्नातको व्रतस्नातको विद्याव्रतस्नात
कश्चेति तथा च याज्ञवल्क्यः गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया वेदव्रतानि वा पारं नीत्वा ह्युभयमेव वेति ।२८॥ ॥ ॥

इतीति अधिश्रीरधिकसंपन्नो भोजकुलप्रदीपः स राजा इति स्वसुः पाणिग्रहणं विवाहं संपाद्य स्वयंवरगतानां म-
हीपतीनां पृथगेकैकशो अर्हणार्थं पूजार्थं अधिकृतान् अधिश्रीरिति नेयुवङ्स्थानावस्त्रीति नदीसंज्ञाप्रतिषेधात्
नपृतश्चेति कप्रत्ययाभावः समादिदेश आज्ञापयामास ।२९। लिंगैरिति मुदः संतोषस्य लिंगैः कपटहास्यादिभिः संवृ-
तक्रियाः विगूढमत्सराः अत एव प्रसन्ना वहिर्निर्मलाः गूढनक्राः अंतर्लीनग्राहा ह्रदा इव स्थिताः तेन नृपाः

इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा । महीपतीनां पृथगर्हणार्थं समादिदेशाधि-
कृतानधिश्रीः ।२९। लिंगैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः । वैदर्भमामंत्र्य ययुस्त-
दीयां प्रत्यर्प्य पूजामुपदाछलेन ।३०। स राजलोकः कृतपूर्वसंविदारंभसिद्धौ समयोपलभ्यं । आदा- समरोपलभ्यमित्यपि पाठः
स्यमानः प्रमदामिषं तदावृत्य पंथानमजस्य तस्थौ ।३१।

वैदर्भमामंत्र्य आपृच्छ्य तदीयां वैदर्भीयां पूजां उपदाछलेन उपायननिमित्तेण प्रत्यर्प्य ययुः ।३०। स इति आरंभसिद्धौ
कार्यसिद्धौ विषये पूर्वं कृता इति कृतपूर्वसंवित् संकेतो मार्गविरोधविषयो येन सः तथोक्तः संवितियुद्धे प्रतिज्ञा-
यां संकेताचारनामस्विति केशवः । राजलोकः समयोपलभ्यं अजप्रस्थानकाले प्राप्तं तद्राजस्यैकत्वात् सर्वेषामप्ये-
कयसंभवात् साध्यमित्यर्थः तत्प्रमदैवामिषं भोज्यवस्तु आमिषं चाल्मियां मांसे तथा स्याद्भोग्यवस्तुनीति केशवः ।
आदास्यमानः ग्रहीष्यमाणः सन् अजस्य पंथानं मार्गं आवृत्य आवरकं ध्यत्तस्थौ स्थितवान् ।३१। ॥ ॥

भर्त्तेति अनुष्ठितः संपादितश्चानंतरजायाः अनुजातायाः। विवाहो येन स तथोक्तः। क्रथकैशिकानां भर्त्ता विदर्भाधि-
पोपि तावत्तथा सत्वानुरूपं उत्साहानुरूपं यथा तथा आसमंतात् दत्तानि यत वस्तु दानानि सपदि। हरणं कन्यायै दे-
यं धनं यौतुकादि तु यद्देयं सदायो हरणं च तादृसमरः। अहरणं हरणीकृता श्रीर्येन स तथोक्तः सन् राघवमजं प्रस्था-
६ पितवान् स्वयमन्वगाच्चानुजगाम। ४१। तिस्त्र इति विदर्भनगरं तस्य प्रभोजः त्रिषु लोकेषु प्रथितेन अजेन सा-

6 भर्तापि तावत्क्रथकैशिकानामनुष्ठितानंतरजाविवाहः। सत्वानुरूपाहरणीकृतश्रीः प्रास्थापय-
द्राघवमन्वगाच्च। ४१। तिस्त्रस्त्रिलोकप्रथितेन सार्द्धमजेन मार्गे वसतीरुषित्वा। तस्मादुपावर्त्तत कुंडि-
नेशः पर्वात्यये सोम इवोष्णरश्मेः। ४२। प्रमन्यवः प्रागपि कोशलेंद्रे प्रत्येकमात्तस्वतया बभूवुः। अ-
तो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य। ४४॥

ॐ मार्गे पथि तिस्त्रो वसतीः त्रिरात्रिरुषित्वा स्थित्वा वसती रात्रिर्वेश्मनोरिति विश्वः। कालाध्वनोरत्यंतसंयोग
इति द्वितीया पर्वात्यये सोमदर्शांते उष्णरश्मेः सूर्यस्य सकाशात् सोमश्चंद्र इव तस्मादजादुपावर्त्तत तं विसृ- ६
ज्य निवृत्त इत्यर्थः। ४३। प्रमन्यव इति नृपाः राजानः प्रागपि प्रत्येकं आत्तस्वं धनं येभ्यस्ते आत्तस्वाः तेषां भावः आ-
त्तस्वता तया आत्तस्वतया दिग्विजये गृहीतधनत्वेन कोशलेंद्रे रघौ प्रमन्यवो गूढवैरा बभूवुः अतो हेतोः स-
मेताः संगताः संतः तदात्मजस्य रघुसूनोः स्त्रीरत्नलाभं न सेहिरे न चक्षमिरे। ४४। ॥ ॥

तमिति दृप्तः गर्वितः स राजन्यगणः राजसंघातो भोजकन्यामूढवंतं नयंतं तमजं वलिप्रदिष्टां वलिना वैरोचनिना प्र
दिष्टां दत्तां श्रियमाददानं श्रियं स्वीकुर्वाणं त्रिविक्रमस्येदं त्रैविक्रमं पादमिंद्रशत्रुः प्रह्लाद इव पथि रुरोध तथा वाजे
मुनि पुराणे वैरोचनं विरोधोपि प्रह्लादः प्राक्तनं स्मरन्न विस्मोर्नुत्क्रममाणस्य पादं भोजं रुरोधहेति ।३५। त
स्या इति स कुमारः अजः तस्याः इंदुमत्याः रक्षार्थं रक्षणार्थं अनल्पयोधं बहुसुभटं पितुरागतं पित्र्यं प्राप्त
मित्यर्थः सचिवमादिश्य आज्ञाप्य तां पार्थिववाहिनीं राजसेनां । ध्वजिनी वाहिनी सेनेत्यमरः । ज्योतीरथ्यां भा

तमूढवंतं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः । वलिप्रदिष्टां श्रियमाददानं त्रैविक्रमं पादमि
वेंद्रशत्रुः ।३५। तस्याः स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः । प्रत्यग्रहीत्पार्थिववाहि
नीं तां भागीरथीं शोण इवोत्तरंगः ।३६। पत्तिः पदातिं रथिनं रथेशस्तुरंगसादी तुरगाधिरूढं । यंता
गजस्याभ्यपतद्गजस्थं तुल्यप्रतिद्वंद्वि बभूव युद्धम् ।३७।

गीरथीं उत्तरंगः शोणाख्यो नद इव प्रत्यग्रहीत् अभियुक्तवान् ।३६। पत्तिरिति पत्तिः पादचारी योधः पदातिं पादचा
रेणाभ्यपतत् । पादाभ्यामततीति पदातिः पादः पदिति पदादेशः । पदातिपत्तिपदगपदाजपादातिकपदातयः रथिनः स्यं
दनारोहाः अश्वारोहास्तु सादिन इत्यमरः । रथेशः रथिनमभ्यपतत् तुरंगसादी अश्वारोहः तुरगाधिरूढमश्वारो
हमभ्यपतत् गजस्य यंता गजारोहः गजस्थं पुरुषमभ्यपतत् इत्थं अनेन प्रकारेण तुल्यप्रतिद्वंद्वि एकजातिसंभ
तं युद्धं बभूव अन्योन्यं द्वंद्वमेषामिति प्रतिद्वंद्विनः योधाः तुल्याः समबलाः प्रतिद्वंद्विनो यस्मिन् युद्धे तत्तुल्यप्रतिद्वंद्वि ।
द्वंद्वं कलहयुग्मयोरित्यमरः ।३७। ।।

नदत्स्विति तूर्येषु नदत्सु अविभाव्यवाचः अनवधार्यगिरः चापभृतो योधाः धानुष्काः कुलमुपदिश्यते येन तान् कुलोपदेशान् कुलनामानि नोदीरयंति स्म अतिमहत्त्वात् वाचो नावबुध्यन्त इत्यर्थः किंतु बाणाक्षरैः बाणेषु लिखितैरक्षरैरित्यर्थः परस्परस्य अन्योन्यस्य ऊर्जितं प्रख्यातं नाम शशंसुः ऊचुः ।४८। उत्थापित इति संयति संग्रामे अश्वैरुत्थापितः स्यन्दनवंशानां रथगणानां चक्रैः सांद्रीकृतः घनीकृतः वंशः पृष्ठास्थिगेहोर्ध्वकोष

नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयंति स्म कुलोपदेशान् । बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः ।
शशंसुः ।४८। उत्थापितः संयति रेणुरश्वैः सांद्रीकृतः स्यंदनवंशचक्रैः । विस्तारितः कुंजरकर्णतालै-
र्नेत्रक्रमेणोपरुरोध सूर्यं ।४९। मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि । बभुः
पिबंतः परमार्थमत्स्याः पर्याविलानीव नवोदकानि ।५०।

वेलोगणे कुल इति केशवः कुंजरकर्णानां तालैः ताडनैर्विस्तारितो रेणुः नेत्रक्रमेण अंशुकपरिपाट्यांशुकेनेवे-
त्यर्थः । स्यादाजानांशुकयोर्नेत्रं क्रमो ह्योपरिपाट्यां चेति केशवः सूर्यमुपरुरोध आच्छादयामास ।४९। मत्स्येति
वायुवशाद्विदीर्णैर्विवृतैर्मुखैः प्रवृद्धानि ध्वजिनीनां रजांसि सैन्यरेणून् पिबंतो गृह्णंतो मत्स्याकारा ध्व-
जा मत्स्यध्वजाः पर्याविलानि परितः कलुषितानि नवोदकानि पिबंतः परमार्थमत्स्या इव बभुः भांतिस्म ।
॥५०॥

=व्या ४ प स्य ४

रथ इति सांद्रे रजसि रथयोः रथांगध्वनिना विजज्ञे ज्ञातः नागो हस्ती विलोलानां घंटानां क्वणितेन नादेन विजज्ञे
आत्मपरावबोधः परस्परविवेकः योधानामिति शेषः स्वभर्तॄणां स्वस्वामिनां नामग्रहणान्नामोच्चारणा
द्बभूव रजोंधतया स्वयं परं च शब्दमनुमाय प्रजह्रुः प्रहरंतीत्यर्थः ।४१। आवृण्वत इति लोचनमार्गमा
वृण्वतो दृष्टिपथमवरुंधतः आजौ युद्धे विजृंभितस्य प्रौढस्य रजएवांधकारो तस्य शस्त्रक्षतानां अश्वद्विपवी
प५ राणां जन्मस्य सतथोक्तः रुधिरप्रवाहः बालारुणोऽभूत ~~बालारुणो भूतः~~ बालसूर्योऽभूत् अरुणो भास्करे पि

रथी रथांगध्वनिना विजज्ञे विलोलघंटाक्वणितेन नागः । स्वभर्तृनामग्रहणाद्बभूव सांद्रे रजस्या
त्मपरावबोधः ।४१। आवृण्वतो लोचनमार्गमाजौ रजोंधकारस्य विजृंभितस्य । शस्त्रक्षताश्वद्वि
पवीरजन्मा बालारुणोऽभूद्रुधिरप्रवाहः ।४२। स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवना
वधूतः । अंगारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे ।४३। प्रहारमूर्छापगमे रथस्था
यंतॄनुपालभ्य निवर्त्तिताश्वान् । यैः सादिता लक्षितपूर्वकेतूंस्तानेव सामर्षतया निजघ्नुः ।४४।

सादित्यमरः । बालविशेषणं रुधिरस्यावर्णार्थं ।४२। स इति क्षतजेन रुधिरेण छिन्नमूलः त्याजितमूलसं
बंध इत्यर्थः । तस्य क्षतजस्योपरिष्टात् पवनावधूतो वाताहतः स रेणुः अंगारशेषस्य हुताशनस्याग्नेः पूर्वोत्थितो
धूम इवाबभासे दिदीपे ।४३। प्रहारेति रथिनः प्रहारेण या मूर्छा तस्याः अपगमे सति रथस्थाः रथे एव स्थित्वा सं
रथिता इत्यर्थः मूर्छितानाम् अन्यत्र नीत्वा संरक्षितमिति सारथिधर्मः यंतॄन् सारथीन् उपालभ्य असाधु कृतमित्यधि
क्षिप्य निवर्त्तिताश्वाः संतः एवं यैः सादिताः एवं यैरहताः लक्षिताः चिह्नादिना परिज्ञाताः एवं प्रहारसमये केतवो ध्वजा

अपीति अर्द्धश्चासौमार्गश्चेति विग्रहः तस्मिन्नर्द्धमार्गे परेषां वाणैर्लूना छिन्ना अपि हस्तवतां कृतहस्तानां धनुर्भृतां
पृषत्काः शराः आत्मजवानुवृत्त्या स्ववेगानुबंधेन हेतुना फलिभिः लोहाग्रवद्भिः सत्यवाणाग्रयोः फलमिति
८ विश्वः अर्द्धवर्त्तेभागाः अग्रपूर्वैरर्द्धभागैः शृणातीति शरः तस्यैहितं शरत्वं लक्ष्यं उपगवादिभ्यो यदिति यत्प्रत्य
यः वेध्यं लक्ष्यं शरव्यं चेत्यमरः संप्रापुरेव न तु मध्ये पतिता इत्यर्थः ।४५। आधोरणानामिति गजसान्नि
पाते गजयुद्धे निशितैश्चक्रोः शैचितैः अत एव क्षुरस्येवाग्रंयेषांतैः क्षुराग्रैश्चक्राख्यायुधविशेषैः हृतान्यपि

अर्ध्वर्द्धभागे परवाणलूना धनुर्भृतां हस्तवतां पृषत्काः। संप्रापुरेवात्मजवानुवृत्त्या पूर्व-
वर्द्धभागैः फलिभिः शरत्वं ।४५। आधोरणानां गजसान्निपाते शिरांसि चक्रैर्निशितैः क्षु
राग्रैः। हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः। ४६।

छिन्नान्यपि श्येनानां पक्षिविशेषाणां पक्षी श्येन उलूक इत्यमरः। नखाग्रकोटिषु व्यासक्ताः केशाः
येषां तानि आधोरणानां हस्त्यारोहाणां आधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः शिरांसि ८
चिरेणपेतुः शरत्र्यपातान्न शिरःपातान् प्रागेवाकृत्यपश्चाद्दृत्थितानां पक्षिणां नखेषु केशसंगतिश्चिर
पातहेतुरित्यर्थः ।४६। ॥ ॥ ॥ ॥

पूर्वमिति पूर्वं प्रहर्त्ता प्रथमं प्रहर्त्ता अश्वसादी अश्वारोहः प्रतिप्रहारे अक्षमम् असमर्थं तुरंगमस्य अश्वस्य स्कंधे निषण्णदेहं मूर्छितमित्यर्थः रिपुं भूयो न जघान पुनर्न जहार किंतु प्रत्याश्वसंतं पुनरुज्जीवंतमाचकांक्ष नायुद्धव्यसनं प्राप्तं नार्त्तं नातिपरिक्षतमिति निषेधस्मरणात् तनुत्यजामिति तनुत्यजां तनुविनिःस्पृहाणामित्यर्थः वर्मभृतां कवचिनां संबंधिभिः बृहत्सु दंतेषु पतद्भिर्विकोशैः पिधानादुद्धृतैः कोशोस्त्री कुड्मले खड्गपिधानेर्थौघदिव्ययोरित्यमरः असिभिः खड्गैः उत्थितं रुधंतं अग्निं विविग्ना भीताः गजाः करसीक

पूर्वं प्रहर्त्ता न जघान भूयः प्रतिप्रहाराक्षमम् अश्वसादी । तुरंगमस्कंधनिषण्णदेहं प्रत्याश्वसंतं रिपुमाचकांक्ष ॥४७॥ तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दंतेष्वसिभिः पतद्भिः । उद्यंतमग्निं समयां बभूवुर्गजा विविग्नाः करसीकरेण ॥४८॥ शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव । रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ॥४९॥

रेण समयां बभूवुः शांतं चक्रुरित्यर्थः ॥४८॥ शिलीमुखेति शिलीमुखैः बाणैः अलिबाणौ शिलीमुखाविति अमरः उत्कृत्तानि छिन्नानि शिरांस्येव फलानि तैराढ्या संपन्ना च्युतैः भ्रष्टैः शिरांसि त्रायंते इति शिरस्त्राणि शीर्षण्यं च शिरस्त्राणमित्यमरः । आतो नुपसर्गे क इति कप्रत्ययः तैश्चषकोत्तरेव पानपात्रप्रचुरेव चषकोस्त्री पानपात्रमित्यमरः । शोणितान्येव मद्यं तं कुल्याः प्रवाहाः यस्यां सा कुल्याल्पकृत्रिमा सरिदित्यमरः । रणक्षितिः मृत्योः पानभूमिरिव रराज ॥४९॥

उपांतयोरिति उपांतयोः प्रांतयोः विहंगैः पक्षिभिः निष्कुषितं तुराडखं [illegible]डितं उरा निष्काषयामि तीगागमः भुजच्छेदं भुजखंडं तेभ्यो विहंगेभ्यो आच्छिद्य विप्रिश(?)त प्रियामांसाप्रिया शिवाक्रोष्टी शिवः कील इति विश्वः। क्रियां शिवा
६ भूरिमायु गोमायुमृग धूर्त्तकाः शृगालवंचकः क्रोष्टुः फेरुफेरवजंबुकाः इत्यमरः। केयूरस्यांगदस्य कोट्या क्षतः
तालुदेशो यस्याः सा सती अपाचकार अपसारयामास करोतेः कर्त्तरि लिट्। ५०। कश्चिदिति द्विषतः

उपांतयोर्निष्कुषितं विहंगैराच्छिद्य तेभ्यः शिरसितप्रियापि। केयूरकोटिक्षततालुदेशा
शिवा भुजच्छेदमपाचकार। ५०। कश्चिद्द्विषत्खड्गहृतोत्तमांगः सद्यो विमानप्रभुतामुपेत्य।
वामांगसंसक्तसुरांगनः स्वं नृत्यत्कबंधं समरे ददर्श। ५१।

खड्गेन नतनोत्तमांगश्छिन्नशिराः कश्चिद्वीरः सद्यो विमानप्रभुतां विमानाधिपत्वं उपेत्य प्राप्य वामां
गसंसक्ता सव्योत्संगसंगिनी सुरांगना यस्य स तथोक्तः समरे नृत्यत् स्वं निजं कबंधं अशिरस्कं कलेव ५
रं ददर्श कबंधोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः ॥५१॥ ॥ ॥ ॥

अथेति अथ भुजि भ्यां किं करोति तुनं दो भुजिभ्यां किं करोमत इति हल्ला युधः ॥ गदाश्लिष्टभुजं केयूरनद्धबाहुं सादित शत्रुपक्षं विनाशित शत्रुव
र्गं हेमांगदं नाम कालिंगनाथं आ॰ सेदुषी आसन्नमवालेंदुमुखी बाला मितिद्वंद्वमंती व भावे परे आसादिति महेंद्राद्रेः समानसा
रः तत्तुल्य महेंद्र इत्यनाम कुलपर्वतस्य महोदधेश्च पतिः स्वामी महेंद्र महोदधी एवास्य गिरिजलदुर्गं इति भावः यस्य यात्रासु स्र
रतां मदद आविलः सैन्यगजानां छलेन महेंद्रो महेंद्राद्रिः पुरो गयातीव अद्रिकल्पा यस्य गजा इत्यर्थः ५४ ज्याघातेति सु

अथ गदाश्लिष्टभुजं भुजिभ्यां हेमांगदं नाम कलिंगनाथं आसेदुषी सादित शत्रुपक्षं बालां मवालेंदुमुखीं व भावे परे
अप्सरसां महेंद्राद्रिसमानसारः पतिर्महेंद्रस्य महोदधेश्च यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेंद्रः ।५४। ज्या
घातलेखे सुभुजो भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः रिपुश्रियं सांजनबाष्पसेके वंदीकृताया इव पद्धती द्वे ।५५। राम ॥

भुजश्चापभृतां पुरोगो धनुर्धराग्रे सरो यो वंदीकृतानां मौर्वीप्रतीग्रहीतानां अग्रहोपगृहीतं वंद्यामित्यमरः रिपुश्रियं सांजनो बाष्पसे
को ययोस्ते कज्जल मिश्राश्रुसिक्ते इत्यर्थः पद्धती वद्वे ज्याघातीनां मौर्वीकरणानां रेखे राजी भुजाभ्यां बिभर्ति द्विवचनात्सव्यसाचित्वं
रिपुश्रियं भुजाभ्यां नेवाहरणातं जेतरे त्वयोस्तत्य पद्धतित्वेनोत्प्रेक्षा तयोः श्यामत्वात् सांजनाश्रुसेकोक्तिः ॥५५॥

यमिति आत्मनः सद्मनि सुप्तं यं हे मागधे सद्मनि सन्निकृष्टः समीपस्थः अतएव प्रासादवातायनैः दृश्यवीचिः मंद्रेण गंभीरेण
ध्वनिना त्याजितो विवर्जितः यामस्य तूर्यः प्रहरावसानसूचकवाद्यं येन स तथोक्तः मंद्रस्तु गंभीरे इत्यमरः द्वौ याम
१० प्रहरौ समावित्यमरः अर्णव इव प्रबोधयति अर्णवस्यैव तूर्यकार्यत्वात्तद्वैयर्थ्यमित्यर्थः समुद्रस्यापि सेव्यः किमन्येषामिति भा
10 वः ५६ अनेनेति अनेन राज्ञा सार्द्धं तालीवनैर्मर्मरेषु मर्मरं ति धनतया अर्थमर्मरः स्वनिते वस्त्रपर्णानां भूषणानां तु सिं

यमात्मनः सद्मनि सन्निकृष्टो मंद्रध्वनित्याजितयामतूर्यः प्रसादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तम्
५६। अनेन सार्द्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु द्वीपांतरानीतलवंगपुष्पैरपाकृतास्वेदलवा मरु
द्भिः। ५७ प्रलोभिताप्याकृतलोभनीया विदर्भराजावरजा तयैवं तस्माद्पावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ५८

जितमित्यमरवचनात् गुण परस्यापि मर्मरशब्दस्य गुणिपरत्वं प्रयोगाद् अवसेयं अम्बुराशेः समुद्रस्य तीरेषु द्वीपांतरेभ्यः आनी
तानि लवंगपुष्पाणि देवकुसुमानि यैस्तैः। लवंगं देवकुसुममित्यमरः मरुद्भिर्वातैरपाकृताः प्रशमिताः स्वेदसलिलबिंदवो
यस्याः सा तथाभूता सती विहर क्रीड ५७। प्रलोभितेति आकृत्या रूपेण लोभनीया आकर्षणीया न तु वर्णनमात्रेणेत्यर्थः विदर्भ
राजावरजा भोजानुजा इंदुमती तया सुनंदया एवं प्रलोभिता प्रचोदितापि नीत्या पुरुषकारेण दूरकृष्टा दूरमानीता ल १०
क्ष्मीः प्रतिकूलं दैवं यस्य तस्मात् पुंस इव तस्मान्मागधाद् अपावर्त्तत प्रतिनिवृत्ता ॥५८॥ छ छ राम राम छ छ

अथेति अथ द्वारे नियुक्ता दौवारकी सुनन्दा तत्र नियुक्तेति ठक्प्रत्ययः द्वारादीनां चेत्यैजागमः आकारेण देवसरूपं देवतुल्यम् उरगाख्यस्य पुर-
स्य पाण्ड्यदेशे कान्यकुब्जनीरवर्त्तिनागपुरस्य नाथमेत्य प्राप्य हे चकोराक्षि इतोऽवलोकयेति पूर्वानुशिष्टां सर्वमुक्तां भोजनस्य राज्ञो गेवा
पत्यस्त्रियं भोज्यामि दुवत्ती की ड्यादिभ्यश्चेत्यत्र भोजात्क्षत्रिये इत्युपसंख्यानस्य ड्यप्रत्ययः यूङश्चाविति चाप् निजगाद इति विलोकयेति दू
वैमुक्ता पश्चाद्वक्तव्यं निजगादेत्यर्थः ५५ पाण्ड्योऽयमिति अंसयोरर्पितालम्बितं इति लम्बा हारो यस्य सः हरिचन्दनेन गोशीर्षाख्येन चन्दनेन
तैलपर्णिकं तु गोशीर्षं हरिचन्दनमस्त्रियामित्यमरः क्लृप्तोङ्गरागः प्रसिद्धोऽनुलेपनो ऽयं पाण्डूनां जनपदानां राजा पाण्ड्यः पाण्डोर्जनपदशब्दात्क्षत्रिया

अथोरगाख्यस्य पुरस्य नाथं दौवारकी देवसरूपमेत्य इतश्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भैमीम् ॥५५॥
पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः। ५६ विं
ध्यस्य संस्तम्भयिता महाद्रेर्निःशेषपीतोज्झितसिन्धुराजः प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः सौस्नातिको यस्य भवत्यगस्त्यः ॥६॥
यि

तड्यण्प्रत्ययः तस्य राजन्यपत्यवदिति वचनात् बालातपेन रक्तो ऽरुणः सानवो यस्य सः सनिर्झरोद्गारः प्रवाहः स्यन्दनसहितः प्रवाहो निर्झरो झा
र इत्यमरः अद्रिराज इव आभाति ॥६०॥ विंध्यस्येति विंध्यस्य नाम्नो महाद्रेः तपनमार्गनिरोधाय वर्द्धमानस्येति शेषः संस्तम्भयिता निवारयिता
निःशेषपीतः उज्झितः पुनस्त्यक्तः सिन्धुराजः समुद्रो येन सः अगस्त्यः अश्वमेधस्यावभृथे दीक्षान्तकर्मणि दीक्षान्ते ऽवभृथो यज्ञ इत्यमरः
आर्द्रमूर्त्तेः स्नातस्येत्यर्थः यस्य पाण्ड्यस्य प्रीत्या स्नेहेन तत्तु दाक्षिण्येन सुस्नातं पृच्छतीति सौस्नातिको भवति टक् तौ सुस्नातादिभ्यश्च
पृच्छतौ सुस्नातादिभ्य इति ठक्प्रत्ययः ॥६१॥ राम ५५ ४

अस्त्रमिति पुरा पूर्वं जनस्थानस्य खरालयस्य विमर्दशंकी दत्तउद्धतो लंकाधिपतिः रावणः दुरालयं दुर्लभमस्त्रं ब्रह्मशिरोनामकं हरादाप्तवता
येन पांड्येन संधाय मैत्रीकृत्य इंद्रलोकविजयाय इंद्रलोकं जेतुं प्रतस्थे इंद्रविजयि रावणस्यापि विजेतेत्यर्थः ६२ अनेनेति महाकु
११ लीनेन महाकुले जातेन महाकुलादञ्खञाविति खञ् प्रत्ययः अनेन पांड्येन पाणौ त्वदीये विधिवद्यथाशास्त्रं गृहीते सति गुर्वी गुरुः
वातो गुणवचनादिति ङीप् महीवरत्नैरनुविद्धो व्याप्तो अर्णव एव मेखला यस्यास्तस्या इदं विशेषणं महार्णमिंदुमत्याच यो ज्यांदक्षिणस्या
दिशः सपत्नी भव अनेन सपत्न्यंतराभावो ध्वन्यते ६३ तांबूलेति तांबूलवल्लिभिः परिणद्धाः परिरब्धाः पूगाः क्रमुकाः यासु तांबूलव

अस्त्रं हरादाप्तवता दुरापं येनेंद्रलोकावविजयाय दृप्तः । पुराजनस्थानविमर्दशंकी संधाय लंकाधिपतिः प्रतस्थे ॥६२॥
अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी । रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ॥६३॥
तांबूलवल्लीपरिणद्धपूगास्वेलालतालिंगितचंदनासु । तमालपत्रास्तरणासु रंतुं प्रसीद शश्वन्मलयस्थलीषु
॥६४॥ इंदीवरश्यामतनुर्नृपोसौ त्वं रोचनागौरशरीरयष्टिः । अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥६५॥

ल्ली तांबूलीनागवल्ली स्यादित्यमरः घोंटा तु पूगः क्रमुक इत्यमरः एलालताभिरालिंगिताश्चंदना मलयजा यासु गंधसारो मलयजो भद्रश्री
श्चंदनोस्त्रियामित्यमरः तमालस्य तापिच्छस्य पत्राण्येवास्तरणानि यासु तासु कालस्कंधस्तमालः स्यात्तापिच्छोपीत्यमरः मलयस्थली
षु मलयस्थलीषु सदा रंतुं प्रसीद अनुकूला भव ६४ इंदीवरेति असौ नृपः इंदीवरश्यामतनुः त्वं रोचनेव गौरी शरीरयष्टिर्यस्याः सा तडि ११
त्तोयदयोः विद्युन्मेघयोरिव वां युवयोः योगः समागमः अन्योन्यशोभायाः परिवृद्धये अस्तु ॥६५॥ राम ६६

स्वसुरिति विदर्भाधिपतेर्भोजस्य स्वसुरिंदुमत्याश्चेतसी तदीयः सुनंदासंबंधिऽपरोदेशो वाक्यं दिवाकरस्यादर्शनेन बद्धकोशमुकुलितेऽर
विंदे नक्षत्रनाथांशुः चंद्रकिरण इवांतरमवकाशं न लेभे ॥६६॥ संचारिणीमिति पतिंवरा सा इंदुमती रात्रौ संचारिणी दीपशिखेव यं यं भू
पालं व्यतीयायातिचक्राम स स भूपालः स सर्व इत्यर्थः नित्यवीप्सयोरिति वीप्सायां द्विर्वचनं नरेंद्रमार्गे राजपथे अट्टो मंडपमेव स्याद
ट्टः क्षौममस्त्रियामित्यमरः विवर्णभावं विच्छायत्वं प्रपेदे ॥६७॥ तस्यामिति तस्यामिंदुमत्यामुपस्थितायामास
न्नायां सत्यां रघोः सूनुरजो मां वृणीत न वेति समाकुलः संशयेनोऽभूत् अथास्याजस्य वामेतरो वामादितरो दक्षिणो बाहुः के

स्वसुर्विदर्भाधिपतेस्तदीयो लेभेंतरं चेतसि नोपदेशः। दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविंदे। ६६। संचारिणीदीपशिखेव रात्रौ यं यं व्यतीयाय पतिं
वरा सा नरेंद्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥६७॥ तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत् वामेतरः संशयमस्य
बाहुः केयूरबंधोच्छ्वसितैर्नुनोद ॥६८॥ तं प्राप्य सर्वावयवानवद्यं व्यावर्त्ततान्योपगमात्कुमारी नहि प्रफुल्लं सहकारमेत्य वृक्षांतरं कां
क्षति षट्पदाली ॥६९॥ राम ६४

यूरबंधोऽंगदस्थानं तस्योच्छ्वसितैः स्फुरणैः संशयं नुनोद ॥६८॥ तमिति कुमारी सर्वेष्ववयवेष्वनवद्यमदोषं तमजं प्राप्यान्योपगमाद्राजांतरोपग
माद्व्यावर्त्तत निवृत्ता तथाहि षट्पदाली भृंगावलिः प्रफुल्लतीति प्रफुल्लः पचाद्यच् फुल्लतेः क्त प्रफुल्लमिति पाठे तथा अनुपसर्गादिति निष्ठा
धादित्युभयमपि न कदाचिदनुपपत्तिरित्युक्तं त्वागसहकारं कृतविशेषमेत्य आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभ इत्यमरः वृक्षांतरं न कांक्ष
ति न हि सर्वोत्कृष्टवस्तुलाभे वस्त्वंतरस्याभिलाषः स्यादित्यर्थः ॥६९॥ राम ५ ५

तस्मिन्निति तस्मिन्नजे समावेशिता संक्रांता चित्तवृत्तिर्यस्यास्तां इंदोः प्रभेव प्रभा यस्यास्तां आह्लादकत्वादिंदुसाम्यं इंदुमतीमवेक्ष्य अनुक्रमज्ञा वाक्ययो
वनिमिज्ञा सुनंदा इदं वक्ष्यमाणं सविस्तरं सप्रपंचं प्राप्यते वा वक्तुं इदं इति घञो निषेधात् ऋदोरप् इति अप्प्रत्ययः विस्तारो विग्रहे व्यासः
१२ स तु शब्दस्य विस्तर इत्यमरः वाक्यं वक्तुं प्रचक्रमे ।७०। इक्ष्वाकोरिति इक्ष्वाकोः मनुवैवस्वतमनुपुत्रस्य वंशे भवो नृपाणां ककुदः श्रेष्ठः ककुच्च
ककुदः श्रेष्ठः वृषांसे राजलक्ष्मणीति विश्वः आहितलक्षणः प्रख्यातगुणः प्रतीतेनुकृतलक्षणाहितलक्षणा विशेषमरः ककुदि वृषांसे तिष्ठं

तस्मिन्समावेशितचित्तवृत्तिमिंदुप्रभामिंदुमतीमवेक्ष्य प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनंदा ।७०। इक्ष्वाकुवंश्यः ककु
दं नृपाणां काकुत्स्थ इत्याहितलक्षणोऽभूत् काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोशलेंद्राः ।७१। महेंद्रमास्थाय महोक्षरूपं
यः संयति प्राप्तपिनाकलीलः चकार बाणैरसुरांगनानां गंडस्थलीः प्रोषितपत्रलेखाः ।७२।

तीति ककुत्स्थ इति प्रसिद्धः कश्चिद्राजाऽभूत् यतः ककुत्स्थादारभ्य उन्नतेच्छा महाशयाः महेच्छस्तु महाशय इत्यमरः उत्तरकोशलेंद्रा
राजानो दिलीपादयः श्लाघ्यं प्रशस्तं ककुत्स्थस्यापत्यं पुमान्काकुत्स्थः काकुत्स्थ इति शब्दं संज्ञां दधाति बिभ्रति तन्नामसंस्पर्शोपि वंशस्य कीर्ति
कर इति भावः पुरा किल पुरंजनो नाम राजा साक्षाद्भगवतो विष्णोरंशावतारः कश्चिदिक्ष्वाकोराजा देवैः सह समययुद्धेन देवासुरयुद्धेम
होक्षरूपधारिणो महेंद्रस्य ककुदि स्थित्वा पिनाकीलीलया निखिलमसुरकुलं निहत्य काकुत्स्थसंज्ञां लेभे इति पौराणिकीक
थानुसंधेया वक्ष्यते चायमेवार्थमुत्तरश्लोके ।७२। महेंद्रमास्थायेति यः काकुत्स्थः संयति युद्धे महानुक्षा महोक्षः अच्चतुरेति निपातः १२
तस्य रूपमिव रूपं यस्य तं महेंद्रमास्थाय आरुह्य प्राप्ता पिनाकिनः ईश्वरस्य लीला येन स तथोक्तः सन् बाणैरसुरांगनानां गंडस्थलीः प्रोषितपत्रले
निवृत्तपत्ररचनाः चकार भर्तृवधादित्यर्थः न हि विधवाः प्रसाधयंतीति भावः ॥७२॥ राम

ऐरावतेति यः काकुत्स्थ ऐरावतस्य स्वगंडस्थलस्यास्फालनेन ताडनेन विश्लथं शिथिलमंगदमंगदेन स्वकीयेन संघट्टयन् संघर्षयन् स्वामप्यग्र्यां श्रेष्ठां मू
र्त्तिमुपेयुषोपि वज्रात्रभिद इंद्रस्यार्द्धमासनं अर्द्धं नपुंसकमिति समासः अधितष्ठौ अधिष्ठितवान् स्थादिष्वभ्यासेन चाभ्यासस्येति षत्वम् सस्यासिनद्धवायेपि
पि न षत्वं न केवलं महोत्सवरूपधारिण एवेंद्रस्य ककुदमारुह्यतः किंतु निजरूपधारिणोपि इंद्रस्यार्द्धासनमित्यपि शब्दार्थः अथवा ।७३। जात
इति । उरुकीर्त्तिर्महायशाः कुलप्रदीपकीर्तिर्दिलीपो नृपतिस्तस्य काकुत्स्थस्य कुले जातः किल यो दिलीपः शक्राभ्यसूयाविनिवृत्तये न तु श
क्तेति भावः एकेनोनाः शतं क्रतवो यस्य स एकोनशतक्रतुस्तस्य भावे ऽतस्त्वे तिष्ठन् इंद्रप्रीतये शततमं क्रतुमश्वमेधं न वितत्वानित्यर्थः ।७४। यस्मिन्नि

ऐरावतास्फालनविश्लथं यः संघट्टयन्नंगदमंगदेन । उपेयुषः स्वामपि मूर्त्तिमग्र्यामर्द्धासनं गोत्रभिदोधितस्थौ ।७३।
जातः कुले तस्य किलोरुकीर्त्तिः कुलप्रदीपो नृपतिर्दिलीपः । अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः ॥७४॥ य
स्मिन् महीं शासति वाणिनीनां निद्रां विहारार्द्धपथे गतानां । वातोपि नास्रंसयदंशुकानि को लंबयेदाहरणाय हस्तं ।७५। पुत्रो र
घुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता । चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिम् ॥७६॥

ति यस्मिन्दिलीपे महीं शासति सति विहरंत्यत्रेति विहारः क्रीडास्थानं तस्यार्द्धपथे निद्रां गतानां वाणिनीनां मत्तानां वाणिनी नर्त्तकी मत्ता विद
ग्धा वनितासु चेति विश्वः वाणिन्यो नर्त्तकीदूत्यावित्यमरः अंशुकानि वस्त्राणि वातोपि नास्रंसयत् नाकंपयत् आहरणाय आहारणं पापहर्त्तुं कोह
स्तं लंबयेत् तस्याज्ञासिद्धत्वादकुतोभयसंचाराः प्रजा इत्यर्थः अर्द्धश्चासौ पंथाश्चेति विग्रहः समप्रविभागे प्रमाणे भावान्नैकदेशिसमासः ।७५।
पुत्र इति विश्वजितो नाम महाक्रतोः प्रयोक्तानुष्ठाता तस्य दिलीपस्य पुत्रो रघुः पदं पैत्र्यं पदमेव प्रशास्ति पालयति यो रघुश्चतसृभ्यो दिशाभ्य आवर्जि
ताहृता संभृता समुपार्जिता च या तां चतुर्दिगावर्जितसंभृतां विभूतिं संपदं मृत्पात्रमेव शेषो यस्यास्तामकरोत् विश्वजिद्यागस्य सर्वस्वदक्षिणकत्वादिति भावः ।७६।

आरूढमिति किंच अद्रीनारूढं उदधीन्वितीर्णं अवगाढं सकलभूगोलकव्यापकमित्यर्थः भुजंगमानां वसतिं पातालं प्रविष्टं ऊर्ध्वं स्वर्गादिकं गतं व्याप्तं इत्यर्थः सर्वदिग्व्यापीत्यर्थः
अनुबध्नाति सनुबंधि च अविच्छेदी कालत्रयव्यापकं चेदित्यर्थः अत एवैवंभूतं यस्य य[illegible]शः इयत्तया अस्मद्देशतः काल[illegible]तो वा केनचिन्मानेन परिच्छेत्तुं परिमातुं ना
लं न समर्थं ॥७७॥ असाविति असौ अजाख्यः कुमारः त्रिविष्टपस्य स्वर्गस्य पतिमिंद्रं जयंत इव जयंतः पाकशासनीत्य[illegible]मरः तं रघुमनुजा जातस्तत्समाज्जात इत्यर्थः तज्जातो वि
१२ मदनुजातो[illegible] भवति जन्य जनकयोरानंतर्यात् गत्यर्थाकर्मकश्लिष[illegible]शीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेति क्तः सोयं सदृशत्वात्सकर्मकत्वं आह चात्रैव सूत्रै
वत्सन्नेहृत्तिकारः श्लिषादयोर्थः सोपसर्गाः सकर्मकाः भवंतीति दम्यः शिक्षणीयो वत्सो यो जः गुर्वीं भुवनस्य धुरं धुर्येण धुरंधरेण चिरमिरूढेन पित्रा शद
13 सं तुल्यं यथा तथा बिभर्ति यथा कश्चिद्दम्यस्सतरोपि धुर्येण महोक्षेण समं वहतीत्युपमालंकारो ध्वन्यते दम्यवत्सतरौ समाविति अमरः ॥७८॥ कुलेनेति कुलेन

आरूढमद्रीनुदधीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टं ऊर्ध्वं गतं यस्य न चानुबंधि यशः परिछेत्तुमियत्तयालं ॥७७॥ असौ कुमारः
तमजोनुजातः त्रिविष्टपस्येव पतिं जयंतः गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येन दम्यः सदृशं बिभर्ति ॥७८॥ कुलेन कांत्या वयसा नवेन गु
णैश्च तैस्तैर्विनयप्रधानैः त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु कांचनेन ॥७९॥ ततः सुनंदावचनावसाने लज्जां तनूकृत्य न
रेंद्रकन्या दृ[illegible]ष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव ॥८०॥ सा यूनि तस्मिन्नभिलाषबंधं शशाक शालीनतया न वक्तुं रोमां
चलक्ष्येण स गात्रयष्टिं भित्वा निराक्रामदरालकेश्याः ॥८१॥

[illegible] कांत्या लावण्येन नवेन नवयसा यौ[illegible]ये वनेन विनयः प्रधानयेषां तैः गुणैः श्रुतशीलादिभि[illegible] आत्मनस्तुल्यं स्वानुरूपममुमजं त्वं वृणीष्व किंवा
दुना रत्नं कांचनेन समागच्छतु संगच्छतां प्रार्थनायां लोट् रत्नकांचनयोरिवातं तमनुरूपत्वाद्युवयोः समागमः प्रार्थ्यत इत्यर्थः ॥७९॥ ततइति ततः सुनंदावचनाव १२
सानेन नरेंद्रकन्या इंदुमती लज्जां तनुकृत्य संकोच्य प्रसादेन मनःप्रसादेनामलया प्र[illegible]शस्तया दृष्ट्या संवरणस्रजा [illegible] स्वयंवरणार्थस्रजेव कुमारमजं प्रत्यग्रहीत् [illegible]चकार सम्यक्कृसा
नुरागमप्रत्यपादित्यर्थः ॥८०॥ सेति कुमारी यूनि तस्मिन्नजे अभिलाषबंधं अनुरागग्रंथिं शालीनतया [illegible]धृष्टतया स्यादधृष्टस्तु शालीनमित्यमरः शालीनकोपीनेऽधृष्टाकार्ययोरिति निपा
तः वक्तुं न शशाक तथापि अरालकेश्याः साभिलाषबंधो रोमांचलक्ष्येण पुलकव्याजेन [illegible] गात्रयष्टिं भित्वा निराक्रामत्सात्विकाविर्भावलिंगेन प्रकाशित इत्य
र्थः ॥८१॥ एम

तथेति सख्यामिव दुर्दुमत्यां तथाभूतायां दृष्टानुरागायां सत्यामित्यर्थः सखिसहचरी सस्य[...] स्वशिख्याविमां पायामितिनिपातनान्ङीष् वेत्रभृत् सुनंदा हे आर्ये व्रजेऽन्यतो
ऽन्यं प्रतिव्रजाम इति परिहासपूर्वमावभाषे अथ वधूरिंदुमती एनां सुनंदां असूयया रोषेण कुटिलं ददर्श अन्यगमनस्य असह्यत्वादित्यर्थः ८२ सेति करभः करप्रदे
शविशेषः मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः करभ उपमा[...]यस्याः सानुरूपस्याः स करभोपमोरूः उरूत्तरपदादौपम्ये इत्यूङ्प्रत्ययः सा कुमारी चूर्णेन गौ
२४ रं लोहितं गुणेन स्रजमित्यर्थः मूर्त्तं मूर्त्तिमंतं अनुरागमिव धात्र्याः उपमातुः सुनंदायाः करात् रघुनंदनस्याजस्य कंठे यथाप्रदेशं यथास्थानं आसंजयामास आ
सत्कं कारयामास न तु स्वयं आसंगः अनौचित्यात् ८३ तथेति वरेण्यो वरणीय उत्कृष्टः हृष्टरोमा हृजरोम्णः सोऽजः मंगलपुष्पमय्या मधूकादिकुसुममय्या प्रकृतया विशालवक्ष
स्थले लंबमानया स्रजा विदर्भराजावरजां इंदुमतीं कंठार्पितौ याबाहू एव पाशो यया तामसंस्त मन्यत लुङ् बाहुपाशकल्प सुखमन्वभूदित्यर्थः ८४ शशिनमिति त

तथागतायां परिहासपूर्वं सख्यां सखी वेत्रधरा बभाषे आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ८२ सा चूर्णगौरं रघुनंदनस्य धात्रीकराभ्यां करभोपमोरूः आसं
जयामास यथाप्रदेशं कंठे गुणं मूर्त्तमिवानुरागं ८३ तया स्रजा मंगलपुष्पमय्या विशालवक्षःस्थललंबया सः अमंस्त कंठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ८४
शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ८५ प्रमुदित
वरपक्षमेकतस्तत्क्षितिपतिमंडलमन्यतो वितानं उषसि सर इव प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ८६ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ स्वयंवर
वर्णनो नाम षष्ठस्सर्गः ॥६॥ राम जी सहाय

तत्र स्वयंवरे समगुणयोः तुल्यगुणयोः इंदुमतीरघुनंदनयोः योगेन प्रीतिर्येषां ते समगुणयोगप्रीतयः पौराः पुरेभवाः जना[...]यः इयमजसंगता इंदुमती मेघैर्मुक्तं शशि
नं शरच्चंद्रं उपगता कौमुदी अनुरूपं सदृशं जलनिधिमवतीर्णा प्रविष्टा जह्नुकन्या भागीरथी तत्सदृशीत्यर्थः इत्येवं नृपाणां श्रवणयोः कटु परुषं एकमविसंवा
दि वाक्यमेव वाक्यं विवव्रुः ८५ प्रमुदितेति एकत एकत्र प्रमुदितो वरस्य जामातुः पक्षो वर्गो यस्य तत् पौरोक्तेः अन्यतोऽन्यत्र वितानं शून्यं भग्नाशयत्वादप्रहृष्टमित्य २४
र्थः तत्क्षितिपतिमंडलं उषसि प्रभाते प्रफुल्लपद्मं कुमुदवनेन प्रतिपन्ना निद्रा मीलनं येन सर इव सरस्तुल्यमासीत् पुष्पिताग्रा वृत्तमेतत् ८६ ॥
इति कोलचल[...]मल्लिनाथसूरिविरचितायां संजीविनीसमाख्यायां षष्ठस्सर्गः ॥६॥ समाप्त[...] ॥ संपूर्णम् ॥ राम